सिद्धान्तरहस्यम्

B10

प्रकाशक

श्री पीताम्बरापीठ संस्कृत परिषद दतिया (म. प्र.)



भगवती

श्री पीताम्बरा बगला

ॐ तत्सत्

सिद्धान्त-रहस्यम्

अर्थात्

सिद्धान्त रत्न मणिमाला

राष्ट्रगुरु श्री १००८
श्री स्वामीजी महाराज

अनुवादक
डा. शिवदत्त शर्मा चतुर्वेदः

प्रकाशक
श्री पीताम्बरापीठ संस्कृत परिषद्
वनखण्डेश्वर, दतिया (म०प्र०)

प्रकाशक

श्री पीताम्बरापीठ संस्कृत परिषद, वनखण्डेश्वर

दतिया (म. प्र.)

संस्कृत-प्रथम संस्करण १०००

गुरु पूर्णिमा–संवत् २०३९

मूल्य ३ रु.

मुद्रक–शिवशक्ति प्रेस, प्रा० लि०

बैद्यनाथ भवन, ग्रेट नाग रोड, नागपुर–९

अनुवादक–निवेदनम्

(१)

राष्ट्रगुरुर्लोकानां नित्यं संतारणे दक्षः
पीताम्बरा भगवतीपीठाधीशः प्रणम्यतेभक्त्या

(२)

सिद्धान्तरहस्याख्यं ग्रन्थं जीवान्समुद्धर्तुम्
निर्मितवान्सरहस्यं सम्पूज्यः स्वामिवर्योऽयम्

(३)

दिव्यतमेऽस्मिन् ग्रन्थे मानवजीवनमहोभावे
नेतुं प्रकाशपुञ्जाऽलोको नूनं विभासते मधुरः

(४)

श्रीमत्स्वामिवराणां चिन्तनधारा विमलतमा
दिव्याऽलोकं ददती ग्रन्थेऽस्मिन् दर्शनीयाऽस्ति

(५)

मणिपञ्चकजटितायामेतस्यां दिव्यमालायाम्
हृदये सुधारितायां जीवनसाफल्यमिहलभ्यम्

(६)

श्रीस्वामिवर्यकृपयैवंताद्दशदिव्यग्रन्थस्य
संस्कृतवागनुवादे भाग्यैरेवाहमादिष्टः

(७)

हिन्दीभाषारचितस्यैतस्य ग्रन्थरत्नस्य
सत्संस्कृताऽनुवादे काठिन्यं नूनमायातम्

(८)

किन्तु स्वामिवराणां चरणस्मरणेन तत्सर्वम्
दूरे पलायितमभूत्स्मरणं महतां परा सम्पत्

(९)

श्रद्धेयाः श्रीमन्तो दामोदरगौडवर्यास्तु
मामादिशन् सुकार्ये भाषाशोधनमथाऽकार्षुः

(१०)

विद्याऽऽयुस्सम्मानैश्चारित्रैर्भूषिता नित्यम्
श्रीमद्गौड़वरेण्याः काश्यां सर्वैः प्रणम्यन्ते

(११)

श्रीशिवनाथः शर्मा महानुभावोऽत्र कार्ये माम्
प्रेरितवानिति तस्मै कृतज्ञतामावहामि हृदयेन

(१२)

अनुवादे यास्त्रुट्यः संजाताः स्युस्समस्तास्ताः
विद्वद्भिः क्षन्तव्या इति विनमन् प्रार्थयेमन्दः

१।५।८२

प्रवक्ता—साहित्यविभागे प्राच्यविद्यासंकायः
काशी हिन्दूविश्वविद्यालयः वाराणसी

निवेदकः-
(डा.) शिवदत्तशर्मा चतुर्वेदः
(अनुवादकः)

प्रकाशकीयम्

राष्ट्रगुरुभिः पीताम्बरापीठाधीश्वरैः श्रीस्वामिपादैः हिन्दीभाषायां विरचितस्य सिद्धान्तरहस्य नामकस्य ग्रन्थस्य संस्कृतानुवाद प्रकाशनावसरे परिषदियं महत्प्रमोदमनुभवति। अयं ग्रन्थः बहुकालपूर्वं १९३८ ईसवीयेवर्षे सर्वप्रथमः प्रकाशितोऽभवत्। १९८० ईसवीयेवर्षे अस्य तृतीय संस्करणं प्रकाशितञ्जातम्।

ग्रन्थेऽस्मिन् पूज्यपादैः संसारक्लेशमग्नानां जीवानां समुद्धरणाय स्वानुभूताः सिद्धान्ताः प्रकाशिताः, येषां पालनेन जनाः साधनामार्गे अग्रेसराः भवितुमर्हन्ति। पूज्यपादैः विरचितेषु ग्रन्थेषु प्रस्तुतस्यास्य ग्रन्थस्य महत्त्वं सर्वैरस्नुभूतम्।

ग्रन्थस्य संस्कृतानुवादः वाराणसी निवासिना पण्डितवर्येण श्री शिवदत्त शर्माचतुर्वेदमहोदयेन कृतः। अनुवादस्य सर्वमपिप्रयत्नं बैद्यनाथ आयुर्वेद भवन नागपुर संचालकेन श्री शिवनाथ शर्मणा कृतम्, तदर्थमुभौ अपि महानुभावौ धन्यवादार्हौ।

चैत्र नवरात्र
सं. २०३९

विनीत।
ललिताप्रसाद शास्त्री
मन्त्री–श्री पीताम्बरा पीठ संस्कृत परिषद्
दतिया (म० प्र०)

॥ श्री. ॥

प्राक्कथनम्

प्रस्तुतग्रन्थस्य "सिद्धान्तरहस्य'स्य द्वितीयं संस्करणं संशोधिते संवर्धिते च स्वरूपे परमपूज्यानां श्री १००८ श्री स्वामी चरणानामसीमयाऽनुकम्पया मानवसमाजस्य कल्याणार्थं प्रकाशितं जातम्। ग्रन्थस्यास्य प्रथमं संस्करणं १८३८ तमे ईशवीयवत्सरे दतिया निवासी भक्तजनानां सत्प्रयासेन प्रकाशितमभूत्। ग्रन्थस्य प्रायो २५० प्रतयः मुद्रणालये अवशिष्टा रक्षिता आसन्। १९४४ ई. वत्सरेऽहं (डिस्काउन्ट बैंक आफ इण्डिया, मैनेजर) कार्यभारस्य धारणार्थं झांसी नगरे गतः। तेष्वेव दिवसेषु मम पूर्वजन्मपुण्योदयवशात् मम परममित्रस्य स्वामिरामतीर्थस्य भक्तः श्री दीनदयालु महोदयः मां सह नीत्वा दतियानगरे गतः। तत्रैव प्रथमतया श्री १००८ श्री स्वामिचरणानां दर्शनानि जातानि। अनन्तरन्त्वीदृहशी दया जाता यत् "अध्यात्मज्ञान विश्वविद्यालयस्य" स्थापनार्थं स्वामिचरणैः झांसीनगरे पादार्पणस्य कृपा कृता। 'गोपाल की बगिया' नाम्नि स्थाने एक मास पर्यंतं झांसी निवासिनः सत्संगतेर्लाभं प्राप्तवन्तः। तस्मिन्नेव काले मया सिद्धान्त रहस्य ग्रन्थस्य सर्वा अत्त्य वशिष्टाः प्रतयः क्रीताः।

अहं सिद्धान्तरहस्यमनेकवारं पठितवान्, परं मूढस्य मम बुद्धौ किमपि नायातम्। अन्येषामेव कल्याणं भवत्विति पवित्र भावनया तादृशान् पुरुषानहं पुस्तकमिदं तदा तदा दत्तवान् ये जिज्ञासव आसन्। अनेनैव प्रकारेण मया सिद्धान्तरहस्यैका प्रतिः स्वसम्बन्धिने सतां महात्मनां सत्संगतिशीलाय श्रीरामदासाय दत्ता। तेन सा प्रतिः वृन्दावनवासिने एकस्मै ब्रह्मचारिमहाशयाय दत्ता। प्रायो वर्षत्रयाऽनन्तरं स ब्रह्मचारि महाशयः ढाईघाटस्थाने (जिला फर्रुखाबाद) गंगातटे समायोजितायां रामनगरियायामनायासेनैव श्रीरामदासेन संगतः,

गद्गद्हृदयेन स तस्याऽभारं प्रकटितवान् उक्तवांश्च यत् "सिद्धान्त रहस्य" पुस्तकेन मम कल्याणं सम्पादितम्। तत्र लिखितायां योगसाधनापद्धतावभ्यासकरणेन मदीया कुण्डलिनी जागृता। प्राप्तसिद्धिरहमस्मि। एतदुपर्याश्चर्यं कुर्वाणः श्रीरामदासः परीक्षाग्रहणाय पृष्टवान्, ब्रह्मचारिणोक्तं यत् स परोक्षे घटिता सर्वा अपि घटनास्तथैव ज्ञातुं समर्थोऽस्ति यथा ताः प्रत्यक्षं दृष्टा भवेयुः। तदनन्तरं निश्चितं यद् ब्रह्मचारिमहाशयः एकस्मिन् स्थाने स्थास्यति, तदुपरि ध्यानदानायैको पुरुषो नियुक्तः। श्री रामदासस्तस्मात् स्थानाद् कुत्रचिद् दूरं गतः। यदा परावृत्तस्तदा ब्रह्मचारिणा सविस्तरं रामदासेन यद्यत्कृतं तत्सर्वं कथितम्।

श्रीरामदासेन यदेयं घटना मामवबोधिता तदा मे चक्षुरुन्मीलितम्, पुस्तकस्य महत्त्वं च मद्बुद्धौ समायातम्। पुस्तकानि वितरणेन समाप्तान्यभवन्। इदमावश्यकमासीद् यत् पुस्तकस्य द्वितीयं संस्करणं प्रस्तुतं स्यात्। मया श्रीचरणानामन्तिके द्वितीय संस्करण प्रकशनानुमति प्रदानाय प्रार्थना कृता। परमदयालुभिः श्रीचरणैर्जीवानामुद्धाराय लययोगस्य विषय संवर्धनं विधाय प्रकाशनस्याज्ञा दत्ता। तदिदं संशोधितं संवर्धितं च द्वितीयं संस्करणं भक्तजनानां सेवायां प्रस्तुतमस्ति।

परमपूज्यस्वामिचरणानां तपस्याकालोपलब्धीनां सैद्धान्तिकं विवेचनं पुस्तकेऽस्मिन् भाषाबद्धं विद्यते यत् "गागरे (पात्रे) सागर" इत्याणकानुसारं सर्वासामाध्यात्मिक-गूढ़रहस्यमय साधना पद्धतीनां कोषो विद्यते। एतत्पठनान्तरमवगमस्य दृष्टिः विवेकोपलब्धिश्च तेषामेव दयायत्ता विद्यते।

द्वितीय संस्करणस्य सफलतायः सम्पूर्णमपि श्रेयः भ्रातृवरश्रीरामेश्वरमहहोदयानामस्ति यैर्निरन्तरमेतत्कृते प्रयासः संरक्षितः। अहं पीताम्बरापीठस्य सम्पूर्णभक्तमण्डल्या आभारं प्रकाशयामि यत् तद्भक्तिश्रद्धासेवानां प्रसादरूपेण प्रकाशनस्याज्ञा मादृशेन किंकरेण सम्प्राप्ता।

अध्यक्ष :
अधिकारी प्रेस, फतेहगढ़
(उत्तर प्रदेश)

परिचयः

परमदयालुभिः श्रद्धेयैः श्री १००८ श्री स्वामिचरणः कलिकालकलुषितानां दुःखाकुलानां मनुष्याणां कष्टनिवारणार्थं 'सिद्धान्तरहस्य' ग्रन्थस्य रचनाया अनुकम्पा कृता। शास्त्रेषु वर्णितानां प्रायशः समस्तानां विषयाणां समन्वयपुरस्सरं श्रीचरणैरत्र सिद्धान्तानां रहस्यस्य विशदं वर्णनं विहितम्।

ब्रह्मणः सत्ता तन्मायया विरचितं चेदं विश्वं ब्रह्माण्डं गूढरहस्यविषयमस्ति। "सिद्धान्तरहस्यस्य" ग्रन्थस्य विषयस्तु रहस्यपूर्णोऽस्त्येव. एतद् रचयितारः श्रीस्वामचरणा अप्येके रहस्यभूता एव सन्ति। गीताकार श्रीकृष्णवत् श्रीस्वामिचरणानां जीवनं लीलाश्च सन्ति परमरहस्यविषयाः। कोऽपि न जानाति यत् स्वामिचरणाः के सन्ति, किमपि तेषां नामाऽस्ति न वा, तेषां जन्मकुलस्य जन्मस्थानादीनाञ्च विषये न कोऽपि जानाति।

झांसी नगरे 'गोपाल की बगिया' स्थाने १९४४ ई. वत्सरे एकस्यां रात्रौ भाववशात् जीवनस्यैकां विशिष्टां घटनां वर्णितवन्तः तदन्तरं मौनाभवन्। तेषां मौनस्य रहस्यावबोधानन्तरं किमपि ज्ञातुं नावशिष्यत इत्यस्ति मदीयो विश्वासः। वृत्तान्तकथनानन्तरं मां दृढ़तयोक्तवन्तो यदहं कस्मै चिदपि न कथयेयम् अयमेव स वृत्तान्तोऽस्ति येन श्री स्वामिचरणानां प्रवृत्तिर्मन्त्रशास्त्रे संजाता।

'सिद्धान्तरहस्य' विषयज्ञानार्थं रचयितृप्रभूणां विषये कश्चन परिचयः लोककल्याणदृष्ट्याऽवश्यको भवति। जिज्ञासु पाठक वृन्दस्तेन श्रद्धाभक्तिपरिपूर्णविवेकस्य जागरणे समर्था भवेयुः। तेषां प्रशंसायां किमपि लेखनं मादृशस्याल्पज्ञ वशवर्तिनी वार्ता नाऽस्ति। तेषां विषये यो यावज्जानाति तदनुसारं स सर्वाधिकं जानाति। श्रीचरणानामन्तिकेऽकिञ्चनस्यास्योपस्थितिरत्यल्पा भवति, परं यदा तत्रोपस्थितो भवामि तदा पवित्रां

लोककल्याणभावनां गृहीत्वा गच्छामि यच्च जपादिकं सञ्जायते तस्योद्देश्य-मिदंयन्मन्त्र शक्त्या ऽधिकाधिका सार्वजनिकी सेवा सम्पादिता स्यात् ।

परमपूज्यैः श्रीस्वामिचरणैः काश्यां संस्कृतविद्याऽध्ययनं कृतम् । अष्टादशवर्षायुष्येव तत्रैवेमे विरक्ता जाताः । जगद्गुरुशङ्कराचार्यद्वारा-प्रातिपादितस्य ज्ञानमार्गस्य दीक्षां गृहीत्वा सन्यस्ता आसन् । दण्डि-स्वामिन इमे आसन् । परिभ्रमन्तः कदाचित् पञ्चनदे गता । तत्रैकस्य महतः (महन्त) समीपे स्थिता आसन् । तत्रैवैतेषां हृदये मन्त्रशास्त्रे प्रवृत्त्यर्थमान्तरिकी प्रेरणा जाता । एतैर्ज्ञातं यदियमस्ति काऽप्यपूर्वा विद्या । अस्या अन्वेषणं विधेयम् । एते पर्यभ्रमन् गुहासु, कन्दरासु । यत्रैव कुत्रापि तन्त्रमन्त्रविद्याया ज्ञातारो ज्ञातास्तत्रेमे गताः । हस्तलिखित-ग्रन्थानामन्वेषणं विहितम् परं कुत्रापि कोऽपि बोधको न मिलितः । स्वामिचरणाः प्राणान् पणीकृत्य संलग्नास्तपस्याम् । यदा तदाऽनेक-दिवसपर्यन्तं भोजनरहिता एवाऽतिष्ठन् परं कस्मैचित्किमपि न कथितवन्तः ।

परिभ्रमन्तो दतियानगरे सम्प्राप्ताः । किञ्चित्कालानन्तरं वन-खण्डेश्वरे समागताः । कालेऽस्मिन् श्रीस्वामिनां चरणे व्रणः संजातः, चलनमपि कठिनमासीत् स्थानमासीदत्यन्तं भयावहम् । रात्रौ कोऽपि तत्र न तिष्ठति स्म परं स्वामिनां कुतो भयम्, तेत्वासन् भयातीताः । व्याधीनां भीषणमाक्रमणं रात्रौ श्रीस्वामिनामुपरि समजायत, परन्तु ते साधनाया विचलिता नाऽभवन् । तैर्वनखण्डेश्वरे ज्योतिर्जागरितम्, एतत्संश्राव्य श्रीस्वामिन एतदुक्त्वा मौनमभजन् यत्- "श्रीपीताम्बरापीठस्य स्थापना संजाता" ।

तदुत्तर या उपलब्धयः संजास्ता भाषानिबद्धा न भवितुमर्हन्ति । तास्त्वनुभवगम्या एव । तादृश आनन्दस्तु साधनयैव प्राप्तुं शक्यते । गीतानुसारं तद्दर्शनाय चर्मचक्षुर्नप्रभवति तदर्थं दिव्यं चक्षुरपेक्षितं भवत्यर्थान्निश्चलं मनस्तत्कृतेऽपेक्षितं भवति । एतदेव रहस्यं

"सिद्धान्तरहस्य"- रूपे प्रकाशयितारः परमपूज्याः स्वामिचरणा एवैतादृशनिश्चयकरणे समर्थाः सन्ति यत् कीदृशः साधकः कया साधनापद्धत्या लाभान्वितो भवितुमर्हतीति । गन्तव्यं स्थानन्त्वेकमेवाऽति, तत्र गमनाय पन्थानो विभिन्ना भवन्ति । प्रत्येकस्मै मानवाय तत्पूर्वजन्मसंस्कारानुकूला वर्तमानजीवनोपलब्ध्यनुसारा च साधनापद्धतिरादिश्यते । सिद्धान्तरहस्यस्य ग्रथनं सार्वभौमसिद्धान्तप्रतिपादकोपनिषद्वत् समस्तमानवतायाः कल्याणाय संजातम् । रहस्यस्य सम्यग्ज्ञानं परमगुरव एव दातुं समर्थाः, विना गुरुकृपामेतत्संभवं नास्ति । एतदेवाऽस्तिपरमं रहस्यम् ।

प्रयागनारायणः श्रीवास्तवः अध्यात्मज्ञान विश्वविद्यालय–
परीक्षापरिषद् ४६ ए. बेलीरोड नया कटरा
इलाहाबाद

भूमिका

मायिकेऽस्मिन्संसारे दुर्लभं मानवजीवनं क्षणभङ्गुरं विज्ञाय प्रत्येकं मानवस्येदमस्ति मुख्यं कर्तव्यं यत् स आत्मकल्याणाय सततं प्रयत्नं कुर्यात्। कल्याणावाप्त्यै ये मार्गाः साधनानि चास्माकं त्रिकालदर्शिभिः पूज्यैः ऋषिभिर्महर्षिभिश्च शास्त्रेषु दर्शितानि तेषां वास्तविकं रहस्यं पूर्णतया ज्ञात्वा तदनुसारं गमनेन साधकोऽवश्यमेवाऽभ्युदयनिःश्रेयसावाप्ति कर्तुं शन्कोति, परन्तु शास्त्रेष्वनेकसम्प्रदायानां विभिन्नमतमतान्तरार्णाच विचित्रवर्णनैस्तेषामपूर्वप्रतिपादनेन तेषां यथार्थं स्वरुपं महापुरुषैरन्येषां कृते ज्ञातुं कठिनमेव।

तदुपरिपुनर्वर्तमानवातावरणप्रभावे श्रद्धाविश्वासयोर्वर्धनशीलाल्पता-कारणात् शास्त्रोपदेशानुकूलाचरणं तु दूरे गतम् प्रत्युत तेषां काल्पनिकत्वं निर्मूलत्वं चोक्त्वा तेषामुपहासः क्रियते।

ईदृशपरिस्थितौमनुष्यः सत्यस्य निर्णयं कर्तुं न पारयति। स न जानाति यदसारेऽस्मिन् संसारे स विशिष्टरूपेणाधिकृतो भूत्वा समायातः जीवनस्य सफलता च मानवस्य प्रधानोद्देश्यत्रताऽस्ति। संसारयात्रा निस्सारासु प्रवृत्तिषु विनश्यति, अमूल्यस्यास्य ज्ञानस्यकृते साधारणतयोपेक्षाभावं धारयति मनुष्यः। परिणामो भवति तादृशो यत् स कर्तव्याकर्तव्यभावनापराङ्मुखः सन् – "पुनरपि जननं पुनरपि मरणम् पुनरपि जननीजठरे शयनम् इति चक्रे निपतन् भीषणयातनानुभवं कुरुते। अतएव परमदयालुभिः पूज्यपादैः श्रद्धेयैः श्रीस्वामिवर्यैः कलिमल-कलुषितानां दुःखाकुलानां मनुष्याणां कष्टनिवारणार्थं सिद्धान्तरहस्यस्य ग्रन्थस्य निर्माणानुग्रहः कृतः। अत्र शास्त्रेषु प्रतिपादितानां प्रायः सर्वेषामपि विषयाणामपूर्वं समन्वयं विधाय तत्सिद्धान्तानां विशदरूपेण वर्णनं विहितम्

मानवजीवनसफलतायै साधनामयेन जीवनेन भाव्यम्। तदर्थं च सर्ववादिसम्मतानां सिद्धान्तानां परिज्ञातं परमावश्यकमस्ति। सिद्धान्ताश्रयग्रहणं विना कापि वार्ता निश्चयरूपेण ज्ञातुं न शक्यते। सिद्धान्तानां निर्णयं विज्ञायैव मनुष्यो निःसन्दिग्धतया व्यवहर्तुं शन्कोति। अतएव सिद्धान्तरहस्यस्य मणिमालायामस्यां ग्रथिता १०९ सिद्धान्ताः मानवजातेः कल्याणे सर्वथा समर्थाः सन्ति।

आचार्येण गौतमेन'सिद्धान्तस्य' व्याख्यायामुक्तं यत्–"तत्राधिकरणाऽभ्युपगमसंस्थितः सिद्धान्तः" अर्थात् शास्त्रेण निर्णीतोऽर्थः सिद्धान्तः कथ्यते–यथा "वादिप्रतिवादिभ्यां निर्णीतोऽर्थः सिद्धान्तः [३]"–अर्थात् वादिप्रतिवादिभ्यामर्थस्य यो निर्णयः क्रियते स एव भवति सिद्धान्तः। सिद्धान्तस्येयं व्याख्या प्रायो दार्शनिकतत्त्वानां निर्णयार्थं प्रयुज्यते तथापि व्यावहारिकाणांमप्यर्थानां निर्णये व्याख्यैषा सम्यगुपयोगिनी भवति। ये परीक्षणानन्तरं निश्चीयन्ते आचरणे च येषां प्रयोगः संजायते प्रायस्तएव विषयाः 'सिद्धान्त'इति संज्ञाया अधिकारिणो भवन्ति। रुचिवैचित्र्येण सिद्धान्तेषु पार्थक्यमपि भवति यत् विभिन्नेषु सम्प्रदायेष्वाश्रयं प्राप्नोति। किन्तु पुस्तकेऽस्मिन् सर्वतन्त्राणामेव सिद्धान्तानां प्रधानया सङ्कलनमस्ति। क्रमशो व्यवहारेषु समागता विषयाः ज्ञानिनां विचारेषु तेषां प्रभावः महात्मभिः काले काले तेषां निर्विरोधं प्रत्यक्षीकरणमित्यादिभिर्मिलित्वा सर्वतन्त्राः सिद्धान्ता विरच्यन्ते। सिद्धान्तानामन्येऽपि भेदाः सन्ति, परं प्रस्तुते ग्रन्थे न्यूने व्यापके च रूपे एव तेषां विवेचनमस्ति।

पुस्तकेऽस्मिन् सर्वप्रथममाचरण सम्बन्धिनः ५२ विषया निरूपिताः। उपक्रमे "आचारःप्रथमोधर्मः" इत्यनुसारेण आचरणप्रकरणस्य स्थानमत्यन्तं महत्त्वपूर्णं समीचीनञ्चास्ति यतोह्याचरणशुद्धिविना कोऽपि पुरूषः सन्मार्गेऽग्रेसरीभवितुं सर्वथा भवत्यसमर्थः। पुस्तकेऽस्मिन् बोधिताः सिद्धान्ता अत्यन्तं विशदतयाकथितास्तेषांञ्च सुबोधतयाप्रतिपादनं जातम्। यद्येतेषु सिद्धान्तेषु मनुष्यःकस्याप्येकस्यापिपूर्णरूपेणानुगामी सञ्जायेत तदा तस्योद्धारो दूरे न स्यात्।

द्वितीये प्रकरणे योगस्य मन्त्रहठादिप्रकाराणां सरलं सारगर्भितं वर्णनमस्ति यत् योगिनां साधकामत्यन्तोपयोगिविद्यते। यद्यपि विषयोऽयं संक्षेपेणोक्तस्तथापि प्रायशः समस्तोपयोगिविषयास्तत्र सन्ति सन्निहिताः।

तृतीयेप्रकरणे विवादानांमध्ये भक्तेरुपासनायाश्च रहस्यस्य स्पष्टीकरणमत्यन्तं शोभनयारीत्या सञ्जातम्। पुराणेषु वर्णितानामाख्यानानां सङ्गतिः, मूर्तीनां रहस्यम्, वाहनानां वैज्ञानिकं विवेचनम्, पञ्चदेवोपासनायास्तात्त्विकं रूपम्, सरस्वती-लक्ष्मी-पार्वत्यादिशक्तीनां योगस्य वर्णनमपूर्वमस्ति। चतुर्थे प्रकरणे शक्तितत्त्वस्य ज्ञानस्वरूपस्य च निर्णयः गम्भीरेण विवेचनात्मकरूपेण संजातः। सहैवसांख्यवेदान्तिनोस्संवादो युक्तिपूर्णो रोचकश्चाऽस्ति।

अवशिष्टे प्रकरणे भक्तिमार्गेणसह सामञ्जस्यतया ज्ञानयोगस्यवर्णनम्, ज्ञानिनो भक्तस्य सगुणनिर्गुणविषयकः सम्वादः पञ्चदेवभक्तानां लक्षणानि चैवमादयो विषया यथायोग्यं समुपस्थापिताः विचाराणाञ्चैका विलक्षणा माला संगुम्फिताऽस्ति।

ग्रन्थकारेण स्वीयया सर्वतोमुख्या प्रतिभया सिद्धान्तरहस्यानां सङ्कलनं सर्वविरोधभावान् दूरीकृत्य विहितम्। सिद्धान्तानां चयनं याथार्थ्येनात्यन्तमुपयुक्तं संजातम्। पुस्तकस्य भाषा सरलसुन्दरसुबोधाविद्यते, ययाऽस्योपयोगिताऽपि समधिकं वर्धिता। शास्त्राणां ते सिद्धान्ता ये समवधानेनाप्यवगता न भवन्ति, ते प्रस्तुतपुस्तकस्य मननेन सहजतयैवावगता जायन्ते। यथार्थतया हिन्दीजगति पुस्तकमिदं स्वसदृशं विलक्षणमेवाऽस्ति।

ग्रन्थलेखकानां श्रद्धेयानां श्रीस्वामिचरणानां परिचयाय पाठकानां स्वाभाविकी समुत्कण्ठा भविष्यति, परन्तु तैरेतावतैव सन्तेष्टव्यं यत् श्रीस्वामिनो विद्वांसः, सन्यासिनो, महात्मानःसन्ति, येषां हृदये प्रीडिताया मानवजातेःकृते सदैव प्रेमवारि प्रादुर्भवति। स्वविषये श्रीस्वामिभिः कस्मैचिदपि कदाचिदेव किमपि ज्ञापितं स्यात् तेषां ज्ञातारः स्वज्ञानेनैव तांस्तथातथा जानन्ति। वस्तुतो महात्मनां परिचयस्तु तेषां विचारा एवसन्ति, ये हि पाठकानांसमक्षे समुस्थापिता विद्यन्ते।

महतः सौभाग्यस्यायं विषयो यदस्माकं दतियानिवासिनामुपरिश्रीमतां विशेषानुग्रहोभवति । श्रीमतां कल्याणमयैः सदुपदेशैरत्र प्रसिद्धे श्रीवनखण्डेश्वरस्थाने श्रीपीताम्बरापीठस्य स्थापना जाता, यत्र समये समये धार्मिकाणामुत्सवानामायोजननि जायन्ते । विशेषावसरेषुश्रीचरणाः उपनिषद् ब्रह्मसूत्र-गीता-पञ्चदश्यादि ग्रन्थानामुपरि प्रवचनद्वारा सर्वसाधारणाञ्जनान्कृतार्थयन्ति । विगते वैक्रमी १८८३ सम्वत्सरेपुरुषोत्तममासे श्रीमतां शुभप्रेरणया सप्ताहपर्यन्तमखण्डो भगवन्नामसङ्कीर्तनमहायज्ञःसम्पन्नः, यत्र "हरे राम हरे राम' इति ध्वनिना सम्पूर्णमपिनगरं गुञ्जितमभूत् ।

श्रीस्वामिचरणानां समीपे भक्तियोगज्ञानादिशास्त्रीयविषयाणां प्रायशश्चर्चासंजायते । त्यागविरक्तिशान्तिप्रतिमूर्तीनां श्रीमतांदर्शनेनोपदेशेन च कदापि तृप्तिर्नजायते । श्रीमतांविषयविवेचनशैली नितान्तंशोभनाऽकर्षिणीच भवति । प्रस्तुते पुस्तके ताःसर्वा अपि विशेषताः प्रतिबिम्बिता भवन्ति ताश्च विज्ञपाठकानामवश्यं दृष्टिगोचरा भविष्यन्ति ।

'सिद्धान्त-रत्न-मणिमाला' कीदृशी निर्मितेति विषये कामपि विशेषांसम्मति प्रकटयितुमधिकारीमयि नाऽस्ति, न वा मयि तादृशी योग्यतैवाऽस्ति यदहमेतादृशगम्भीरविषये कामपि विचारपूर्णां सम्मतिंप्रकटीकुर्याम् । मया तु केवलं श्रीस्वामिचरणानामाज्ञापालनंकृतम् । विषयेऽस्मिन् विचारशीला विद्वान्सो महात्मान एव किमपितथ्यंवक्तुं शन्कुवन्ति । एतावन्निवेदनमवश्यमहं प्रकटयितुमिच्छामियत् व्यवहारयोगोपासना-वेदान्तादि सूक्ष्म-विषयाणामुपरीदृशः सरलो निबन्ध-इतः पूर्वमद्दृष्टो नाऽयातः । आशाऽस्ति यत् पाठकानामेतेन ग्रन्थेन समुचितस्य सन्तोषस्यप्राप्तिर्भविष्यति ते चैतस्यव्यवहारेण स्वजीवनं सरलं विधाय परमात्मनोऽनुग्रहस्य पात्राणि भविष्यन्ति ।

दतिया
विजयादशमी सं. १८८५ वि.

बलवीरसिंह
साहित्य भूषणम्

ब्रह्मलीन

श्री पीताम्बरा पीठाधीश्वर राष्ट्रगुरु परमपूज्य श्री १००८ श्री स्वामी जी महाराज, वनखण्डेश्वर, दतिया (म०प्र०)

ॐ तत्सत्

सिद्धान्त-रहस्यम्

(आचाररत्नमणिग्रथनम्)

मानवीयं जीवनं नितरामेवामूल्यं विद्यते। यावन्तोऽप्युत्तमाः पदार्थाः प्राप्तव्यतया शास्त्रेषु विहितास्तेषामधिकारी मानव एव भवति। अर्थः, धर्मः, कामः, मोक्ष इत्येतेषां चतुर्णामपि पुरुषार्थानां सिद्धिरस्मिन्नेव जीवने सम्भवति। परमपुरुषार्थरूपस्य परमात्मनः प्राप्तिमपि मनुष्य एव कर्तुं शक्नोति, तथाप्येतस्मिन्संसारजाले विनिपत्य मनुष्यस्तदिदं रहस्यं ज्ञातुं न पारयति यद् यथार्थः पन्थाः कः? यदुपरि चलनेन स्वीयगन्तव्यस्थानं सम्प्राप्य शान्तिलाभं कुर्यात्। सद्गुरुः सच्छास्त्राणि सत्सङ्गश्चैव तमिमं बोधयितुं समर्थाः। यतो हि सत्सिद्धान्तानां परिचय एभिरेव भवति। एतास्तिस्र एव वार्ता आधारीकृत्य मालाया एतस्या रचना विहिता। तत्र सर्वप्रधानम् आचरणं भवति, अन्या अवशिष्टा वार्तास्तदनन्तरमायान्ति। अतः सर्वप्रथमं तस्यैव ग्रथनं क्रियते।

१. अधिकारं विना कस्मिन्नपि विषये भाषणं व्यर्थं भवति।

२. वागिन्द्रियस्य संयमो मनुष्यस्य बह्वीर्विपदो निवारयति। अतो मौनस्याभ्यासो नितान्तमावश्यको भवति, परं वाण्या भाषणविराममात्रं मौनं न भवति। यथार्थतया इयं मनसः साधना भवति—

"मौनमात्मविनिग्रहः"

अर्थान्मौनं मनसो निग्रह उच्यते। स्वामिना स्वरूपानन्देन स्वीयैका शोभना टिप्पणिरस्मिन् विषय एवं दत्ता—

Mauna is the result of control of thought so for as it concerns speech or it may mean the condition of the Muni or also the practice of meditation.

अर्थात् वाण्या सम्बद्धानां विचाराणां संयमस्य परिणाम एव मौनं भवति। अथवा मुनेरवस्था मौनं वक्तुं शक्यते, ध्यानस्याभ्यासोऽपि मौनमुच्यते।

३. शब्दस्यार्थस्य च बीजाङ्कुरवदनादिः सम्बन्धो विद्यते। सृष्टेः प्रथमे काले उभावप्येतौ परमकारणे शक्तिरूपेण निवसतः अवसरं च समासाद्य प्रकटौ भवतः। यथा गुणपरिणामः नानाप्रकारात्मकाण्यर्थरूपाणि धारयति तथैव शब्दोऽपि विभिन्नानि रूपाणि धारयति। प्रत्येकः शब्दः एकस्यानेकस्य चार्थस्य व्यञ्जको भवति। यथा अर्थविषये विधिनिषेधात्मका व्यवहारा भवन्ति, अमुकं कार्यं करणीयम् न वा करणीयमिति तथैव स्थितिर्भवति शब्दविषयेऽपि। सत्यप्रियहितशब्दानामुच्चारणमुत्तमम्, कटुनिरर्थकनिन्दात्मकानामुच्चारणं च निषेधकोटौ समायाति। विहितशब्देष्वपि भवति तरतमभावः। सात्त्विकज्ञानयोगभक्त्युपासनादयाश्रद्धोपकारधर्मदेवर्ष्यादिविषयाणां प्रकाशकाः शब्दाः उत्तमकोटौ स्थिताः सन्ति। राजधनिकादिप्रकाशका मध्यमकोटिस्थिताः, खट्वाघण्टिकाघटपटादिशब्दाअधमकोटिस्थिताः, गालिप्रदानादिषूपयुक्तास्तु निषिद्धकोटौ परिगण्यन्ते। प्रायशोऽनुभवे दृश्यते वार्तेयं यन्मन्त्रजपशीलाः, सद्ग्रन्थानां स्वाध्यायकर्तारः प्रियशब्दानां व्यवहारकर्तारश्चैव 'महात्मानः' 'विद्वांसः' 'हितैषिणः' इत्येवमादिभिः शब्दैर्व्यवह्रियन्ते। एभिरेव मनुष्यस्योत्तमगुणानां परिचयो भवति यदमुकः

पुरुषः कियतीं शक्तिमैश्वर्यं सौन्दर्यं प्रेम जगद्हितं स्वस्मिन् व्यनक्ति। सर्वेषामेतेषां भावानां सम्मिलनं शब्दैरेव भवति। शास्त्रे सत्यप्रियहितशब्दानां व्यवहारस्य सङ्केत उक्ताभिप्रायेणैव विद्यते। यदा मनुष्यमसहनशीलं क्षुद्रम्, कामिनम्, निर्विचारम्, मूर्खम्, अभिमानिनम्, कपटयुक्तम्, निन्दकम्, गर्वभरितमुपलभामहे तदा तस्यैकमात्रं कारणमेतेषां भावानामभिव्यञ्जकानां निषिद्धशब्दानां तत्कृतो व्यवहारो दृश्यते। तस्मादुत्तमभावानां सम्प्राप्तये विहित-शब्दानां व्यवहारस्याभ्यासो भवेत्। एतेनैव मनुष्यस्य प्रारम्भिकः परिचयो भवति यत् स कस्यां कोटौ स्थित इति।

४. यथार्थतया वेदोपनिषद्गीतापुराणादिग्रन्थसमुदायः वाङ्मयौचित्यस्य चरमविकासस्य च इतिहासस्वरूपा विद्यते। याथार्थ्येन एते एव मनुष्यजातेरितिहासा वक्तुं शक्यन्ते। केवलमुत्पत्तिमरणादीनां लौकिकीनां साधारणवार्तानां विचार एव इतिहासो न कथ्यते। यस्यां जातौ नास्त्येतत्सर्वं, यथार्थतया निर्जीवशरीराकारवदेवास्ति सा जातिः। आर्यजातेः श्रीमद्भगवद्गीताग्रन्थः विचाराणां शब्दौचित्यस्य च सर्वश्रेष्ठो ग्रन्थो विद्यते। एतेषां ग्रन्थानामाधारं गृहीत्वैव मानवीयविकासस्येतिहासलेखनं इतिहासकाराणां मुख्यं कर्तव्यमस्ति। केवलं बाह्यसभ्यताया निरीक्षणं तदनुसारेणैव वा उन्नतेर्ह्रासस्य निर्णयश्च एकदेशीयोऽपूर्णश्च भवति। शब्दौचित्यज्ञानायोक्तग्रन्थानामभ्यासः साधकस्य नितान्तं हितसम्पादको भवति।

५. कस्यापि विषये परोक्षे सम्मुखे वा स्वीयमेकं निश्चितं मतं निर्धारयन्तु। यदि केनापि कारणेन अप्रियसत्यं न वक्तव्यं स्यात् श्रोता वा तत् श्रोतुं नेच्छेत, तदा कस्यामप्यवस्थायां तस्य चर्चा न कार्या। प्रायो दृष्टम्, मिथ्यासभ्यताया लौकिकप्रतिष्ठाया वा मदे मनुष्यः निम्नश्रेणिकानुद्गारान् व्यञ्जयति, ये द्वेषेणोपहासेन वा सम्बद्धा भवन्ति। यदा तदा तु व्यवहारैरीदृशैर्महतो हानि-

र्जायते। रामायणमहाभारतसदृशा महामहान्तो विवादविग्रहा एतस्यैवोदाहरणभूताः। अद्यापि ये रक्तपाता विवादा वा भवन्ति तत्राप्याधिक्येनेषैव वार्ता सन्तिष्ठते। एतादृशा भावाः निन्दापिशुनतादिशब्दैः शास्त्रेषु कथिताः।

६. येनापि व्यवहारो रक्षणीयः स्पष्टता तत्र भवेत्। यदि समयविशेषे परिणामे सुखावहतायाः कथने च कटुताया अनुभवः कर्तुमापतेत् तदा न कापि क्षतिः। एतद् विरुद्धाचरणेन व्यवहारः सर्वदैव पंगुर्भवति। यदि नैव स्थापनीयो व्यवहारः, तदा सम्बन्धं विच्छिद्यापि शान्ता भवितुमर्हन्ति।

७. दृश्यते यद् बहवो जना बाह्येन सम्बन्धेन पृथग् दृश्यन्ते। अन्यान् मनुष्यांस्ते तथैवाचरितुं प्रेरयन्त्यपि, तथापि मनसि तेषामेवपरित्यक्तानां सम्बन्धानां विषयेष्मुदीर्घयोजनानां निर्माणं कुर्वन्ति। केनचिद् यद्यपकारः कृतः तदा केन प्रकारेण तस्योत्तरं स्यात्, कथं स पतितः स्यात् कथं वा तस्यानिष्टं भवेदित्येवं ते सदैव विचारयन्ति। एतत्सर्वं चात्यन्तहानिकरतया परिणतं भवति, एतच्च प्रतिहिंसादिरूपे परिणतं सदनर्थोत्पादकं भवति। अतः एभिः सर्वदा दूरतोऽवस्थानस्य प्रयत्नो नितान्तमावश्यकः।

८. कस्यापि विषये अन्यमनुष्याणां विचारानुसारेण स्वीयमपि मतं न स्थिरीकरणीयम्। यावत् पूर्णा परीक्षा न स्यात् तावत् कस्या अपि वार्तायाः स्थिरीकरणं हानिकरं भवति। परीक्षानन्तरं कामं भवेत् सत्यैव सा वार्ता परं तथापि विचारस्तत्रावश्यकः। ये पुरुषाः केवलं श्रवणयोरेव विश्वसन्ति ते पश्चात्तापज्वालायां भस्मीभवन्ति।

९. यदा किमपि करणीयं कार्यं समागच्छेत् तदा सर्वतः प्रथमं कर्मयोगी साधन-परिणाम-लोककल्याणात्मकल्याणानामुपरि दृष्टि

निक्षिपेत्। चतुर्ष्वप्येतेषु यस्याऽपि न्यूनता स्यात् सर्वतः प्रथमं तस्यैव पूर्तिं कुर्यात्। एतदतिरिक्तं विरोधिन्यः शक्तयोऽपि कर्मयोगिना सह युध्यन्ति, परन्तु शान्त्या, क्षमया, विचारेण आत्मसंयमेन च भवन्ति निष्फलास्ताः। यदि पूर्वोक्तासु चतसृष्वपि वार्तासु भोगलोभगौरवप्रतिष्ठादलबन्धानां द्वषस्य च स्थानं भविष्यति तदा कार्यं दृढं न भविष्यति। कयाऽपि लौकिकया बुद्धया कृतं कार्यमभिचारायैव भवति। कस्यापि कार्यस्यारम्भात् पूर्वं सूत्रस्यैतस्य मननपूर्वकं चित्तवृत्तेः समीकरणं विधेयम् समये चावश्यककार्याणां सम्पादनस्याभ्यासः करणीयः। यः समयसीमानं न धारयति स असफलो भवति।

१०. स्वीयानां त्रुटीनां स्वीकर्तैव शोधयितुं शक्नोति। यस्त्रुटीनां मिथ्यारूपैर्गोपनमभिवाञ्छति यथार्थतया स बह्वीर्बाधाः स्वयमुत्पादयति, विविधमिथ्याभाषणं तेन करणीयं भवति। एतादृशाचरणशीलोऽत्यन्तं शोचनीयावस्थां प्रपद्यते। तेन तत्सम्मुखे त्रुटीनां समुदायो निरन्तरं परिवर्धते, अन्ते च स सर्वनाशं गच्छति।

१ . ध्रुवसत्यमिदं यद् बाह्यसंसारादाशां धारयद्भ्यः संसारः तदेव कर्तुं शक्नोति यद् यूयं तत्कृते कुरुथ। अवस्थायामस्यां यद् युष्माभिः प्राप्यते तद् युष्मत्कृतमेवास्ति। एतदर्थं कस्याप्यदृश्यस्य कारणस्यावधारणा व्यर्थैवास्ति।

१ . व्यर्थे वार्तालापे कालयापनम्, दुर्व्यसनेषु लिप्तता, विविधक्रीडनपत्रकादिक्रीडास्वभिरुचिः, स्वीयजीवनस्यानावश्यककार्येषु संलग्नता, निन्दाकुचेष्टास्वभिलिप्तादीनि निरुद्देश्यजीवनवतां मनुष्याणां लक्षणानि सन्ति। अल्पाहारः, मितभाषणं, दीनानानां साहाय्यं, परमात्मनि दृढा विश्वासः, रागद्वेषपरित्यागः, समस्तेषु प्राणिषु च प्रीतिधारणं, सत्यभाषणम्, निरपेक्षसेवाभावः, सत्पुरुषाणां लक्षणमस्ति।

१३. कस्यापि कार्यस्य शास्त्रशिष्टानुमोदत्वेनैव तस्य स्वीकारः समुचितो न भवति। यावत्स्वयं करणेनानुभवो न स्यात् तावदज्ञानं कस्यामपि कोटौ तिष्ठत्येव। कामं भवेत् सर्वथा सत्य एव सिद्धान्तः तथापि यावत्स्वानुभवो न स्यात् तावत् कस्यापि सिद्धान्तस्यानुगमनं कदापि न भवति लाभप्रदम्। अतएव कस्यापि सिद्धान्तस्य समीक्षणे (गुणदोषविचारे) मनुष्यः शीघ्रतां न कुर्यात्। अद्य या वार्ताऽस्मदनुभवे समागता श्वः सा यथार्थसत्या न स्यात् मिथ्या स्यात्। अतोऽस्मिन् अपूर्णे उत्तरदायित्वे कापि वार्ता कस्यापि न बोधनीया।

१४. यो मनुष्यः संयमनियमसद्विचारोद्योगेभ्यः पराङ्मुखो भूत्वापि महत्त्वाकांक्षी भवति, स मृगमरीचिकाजलेन पिपासां शमयितुमिच्छति।

१५. सत्यभाषणं सद्व्यवहारश्च सफलतायाः सर्वश्रेष्ठा रीतिरस्ति। यदैव कदाचित्सफलतादृष्टिपथमागच्छति तदा कस्मिन्नपि रूपेऽन्वेषणेनासत्यमेव मिलिष्यति। एतत्कृते ईश्वरे कर्मणि वा दोषारोपणमज्ञानमस्ति। "सत्यप्रतिष्ठायां क्रियाफलाश्रयत्वम्" [पा० योगसूत्र २,३६] अर्थात् सत्यस्य प्रतिष्ठायां सत्यां समस्ताः क्रियाः सफला भवन्ति।

१६. मनुष्यस्य शरीरं सर्वविधशक्तीनामभिव्यञ्जकमधिष्ठानं विद्यते। योगस्य सहायतया मनुष्यो यद् वस्तु वाञ्छेत् तत् प्राप्तुं शक्नोति। मन एवास्य शक्तिपुञ्जस्य [Power house] मुख्यं परिचालकमस्ति [Engine]। तद् द्वारेणैव सर्वेषामभिव्यक्तिर्भवति। बाह्यविज्ञानस्य या तावदुन्नतिरस्मिन् काले दृश्यते तस्यापि कल्पना वैज्ञानिकानां मनस्येव सर्वप्रथमं प्रादुर्भूता। स्वर्गनरकमोक्षादि सर्वाणि वस्तूनि मनस्येव तिष्ठन्ति, इदं दृश्यमानं सर्वं जगन्मनस एव कल्पनाऽस्ति। मनसि विशुद्धे सति यावन्ति शोभनानि वस्तूनि

सन्ति तानि सर्वाणि मनुष्येण सुलभानि। अतो मनसः शुद्धेः पवित्रतायाश्च सम्पादनं तदग्रतायामभ्यासश्चैवोन्नतेः प्रथम उपायोऽस्ति। महर्षिपतञ्जलिना मनसो निरोधद्वारा नैकविधाः सिद्धयः सम्प्राप्यन्ते इति प्रदर्शितम्। ब्रह्मानन्द रूपं परमसुखमपि मनसः शुद्धौ पवित्रतायां चैवोपलब्धुं शक्यते।

"मन एव मनुष्याणां कारणं बन्धमोक्षयोः" अर्थान्मन एव मनुष्याणां बन्धस्य मोक्षस्य च कारणमस्ति।

१७. स्वस्यापराधिनं प्रति क्षमाधारणं धीरस्यैव पुरुषस्य कार्यमस्ति। यतो हि निन्दकपुरुषद्वारा स्वार्थहानिं विलोक्य मनुष्यस्तूर्णं तस्यापि निन्दायां प्रवृत्तो भवति। एवं रागमिश्रितो द्वेषो द्विगुणं रूपं धारयति क्लेशस्य च प्रहारस्तत्र प्रारब्धो भवति। वस्तुतः क्रोधस्य प्रतीकारः क्रोधद्वारा न जायते। एतेन तु मालिन्यं ज्वलनात्मकाभावश्च सुतरां वर्धते, तेन शन्तिर्नैवासाद्यते। विरोधिनो विरोधभावस्य दूरीकरणं तु क्षमया संजायते। एतेनैव विरोधिनामुपरि विजयः प्राप्तुं शक्यते।

"क्षमाशस्त्रं करे यस्य दुर्जनः किं करिष्यति।
अतृणे पतितो वह्निः स्वयमेवोपशाम्यति॥"

यदि क्षमारूपं शस्त्रं समीपे विद्यते तदा खलपुरुषः किं कर्तुं शक्नोति। यथा तृणशून्ये स्थानेऽग्निः शाम्यति तथैव खलानां तत्र मनोरथा न सिद्धयन्ति।

१८. सात्त्विकभावानामुद्रेकेण सद्विचारध्यानोपासनालोक कल्याणात्मकल्याणसम्पादकानां शुभकर्मणां प्रवृत्तिर्भवति। एतेषु सर्वश्रेष्ठो भवति सद्विचारः, परन्तु योगाभ्यासेन विना सात्विकभावानामुद्रेकः, आनन्दस्य प्रवाहः, सद्विचारस्य च संस्थितिर्नभवितुमर्हति। आनन्दोऽपि सद्विचारादेव प्राप्यते। राजसतामस-

भावानामवरोधस्य मुख्योपायाः भजनमभ्यासः सत्सङ्गश्चैवाऽस्ति। त्रीण्यपीमानि साधनानि योगस्य प्रधानकारणानि सन्ति। योग-मार्गप्रवृत्तानां साधकानां कृते एतेषां पालनमत्यन्तमाश्यकमस्ति।

१९. कस्यापि सद्विचारस्य [इष्टध्यानादीनां] चित्ते स्थिरी-करणाभ्यासः, अधिकाधिकं तस्मिन्नेव विचारे निमज्जनाभ्यासश्चैव विकृतविचारेभ्यो रक्षणस्य प्रधान उपायोऽस्ति। बाह्या साधनाऽपि चित्तैकाग्रतायां सहायतां करोति तथापि मानसिकी साधनैव तमिमं पूरयितुं पूर्णतया समर्था भवति। तयैव विचारेषु स्वच्छता समा-याति। अस्य पूर्णा सिद्धिस्तदैव भवति यदा दूषितविचाराणां मनुष्य यथेच्छं प्रहारं कुर्यात् परन्तु साधकः स्वीयनिर्णयेन किञ्चिदपि विच-लितो न भवेत्। इदं ब्रह्मास्त्रं वक्तुं शक्यते यतो हि कस्यामपि दशायामिदं निष्फलं न भवति।

२०. सहनशक्तिः [तितिक्षा] वर्धनीया। अनयैव विवेकस्य सद्विचारस्य च स्वतन्त्रता प्राप्यते। पराधीनज्ञानस्य विचाररक्षण-मपि दासताविशेष एवास्ति [Slavery], या आलस्ययुक्तान् जनान् शीघ्रं वशीकुरुते। अस्याः सहनशक्तेः सम्प्राप्तौ शत्रूणां शक्तिः पराभूता भवति। इदमीदृशं शस्त्रमस्ति यन्मानवं सफलतायाः समीपं नयति विरोधिनश्च निष्प्रभान् करोति।

२१. रोगनिवृत्तौ मनसो नैर्मल्यं, शरीरे लाघवं, यादृशं भवति तादृशं यदि सदैव स्थिरं स्यात् तदा मनुष्यो विचारमार्गे सत्वर-मुन्नतिं कर्तुं शक्नोति। आहारे राजसपदार्थानां सेवनानन्तरं तामस-तत्त्वानामाधिक्ये व्याधेरुत्पत्तिर्भवति। विचारोन्नत्यभिलाषिभिरेत-स्योपरि ध्यानं देयम्। विपरीतैर्विचारैरेवैतद् भवति, अतएवा-हारस्य विषये विचारस्य संयमः परमावश्यकः। राजसानि ताम-सानि च तत्त्वानि सात्त्विकतत्त्वापेक्षया समधिकानि न भवेयुः।

२२. आहारस्य शुद्धतयैव मनः शान्तं शुद्धं च भवति। आहारे जातिर्निमित्तमाश्रयश्चेति दोषत्रितयस्यान्नसम्बद्धस्य विचार आवश्यको भवति।

(अ) जात्या दोषयुक्ता पदार्थाः रसोनः [लहसुन] पलाण्डुः [प्याज] मांसम्, मद्यम्, मरिचम्, गञ्जम्, [गांजा] भङ्गादयः, सन्ति, एतेषामुपयोगेन मनः व्यग्रं भवति बुद्धिश्च नश्यति।

(ब) उच्छिष्टानां मक्षिकामशकादिजन्तूनां सम्पर्के यदन्नमायाति तन्निमित्तदोषयुक्तमुच्यते, स्पर्शास्पर्शदोषोऽप्यत्रैवान्तर्भवति।

(स) विहिताविहितोपायानां विचारं विना यस्यान्नस्योपार्जनं ग्रहणं वा भवति तत्र भवत्याश्रयदोषस्य सम्बन्धः। अतएव भगवता मनुनोक्तम्—

"आलस्यादन्नदोषाच्च मृत्युर्विप्रान् जिघांसति" अर्थादालस्येनान्नदोषेणैव च ब्राह्मणानां मृत्युर्भवति। एतेन दोषत्रयेण रहितस्य शुद्धान्नस्य ग्रहणेनैव मनःशुद्धिर्भवति। मनो ह्यन्नस्य सूक्ष्मांशेन निर्मितं भवति। श्रुतावप्युक्तम्—"अन्नमयं हि सोम्य मनः", अर्थात् हे प्रिय! अन्नमयमेव मनो भवति। यादृशमन्नभक्षणं क्रियते तादृशमेव मनो निर्मितं भवति। अतएव श्रुतावुक्तम्—

"आहारशुद्धौ सत्त्वशुद्धिः सत्त्वशुद्धौ ध्रुवास्मृतिः स्मृतिलाभे सर्वग्रन्थीनां विप्रामोक्षः।" [छा०, ७]

अर्थादाहारशुद्धयाऽन्तःकरणस्य शुद्धिः संजायते, अन्तःकरणशुद्धौ निश्चला स्मृतिः सम्प्राप्यते, तादृशस्मृतिलाभे सम्पूर्णग्रन्थीनां विनाशः संजायते। अतएव विचारोन्नतिं कामयमानैरेतस्य स्मरणं नितान्तमावश्यकमस्ति।

२३. मनुष्यस्य त्रुटयः, हठ अकर्मण्यतैव तदुपरि विपत्तीनामवसरानुपस्थापयन्ति। अतएव विपत्काले एतज्ज्ञात्वा एतेषां दूरी-

करणस्य प्रयासः कर्त्तव्यः। ईश्वरभजनेन सत्संगद्वारा च मनुष्यो यथार्थां सहायतां लभते, तथापि तस्यामवस्थायां कर्तव्यं मुख्यं भवति, यतो हि अकर्मण्यदशायामेव मनुष्यो दुर्विचाराणां पात्रं भवति। पुनस्तैरेव मनुष्याणां दुःखसमुत्पत्तिस्स्यात्।

"कुरु कर्मैव तस्मात् त्वं कर्म ज्यायो ह्यकर्मणः" अर्थात् कर्माकरणात् कर्मकरणं श्रेष्ठमस्ति, अतः कर्म कुरु, गीतावचनेऽस्मिन्निदमेव तत्त्वमुक्तम्।

२४. सर्वैर्मनुष्यैः सह कस्यापि कर्त्तव्यस्य सम्बन्धो विद्यते। विना केनचित् करणेन कोऽपि संसरणशीलेऽस्मिन् संसारे क्षणमात्रमपि न स्थातुं शक्नोति। प्रत्येकस्यापि कर्मणः मनस उपरि निर्दुष्टो दुष्टो वा प्रभावो निपतति। एतेन भवति संस्काराणां सृष्टिः। तेष्वपि मनसि येऽधिकं प्रियतया भासन्ते तेषां वासनया तृष्णा समुत्पद्यते, तेषां फलप्राप्तये च मनुष्यो व्यग्रः संजायते। इदमेव तत्त्वं लौकिकप्रवृत्तौ प्रधानरूपेण कार्यं कुरुते। लक्ष्यमिदं पुरस्कृत्य प्रत्येकस्या अपि प्रवृत्तेः परिचयः सरलतया कर्तुं शक्यते।

२५. तृष्णामूला प्रवृत्तिः शान्तेः सुखस्य च हेतुर्न भवति। यतो हि—"लाभाल्लोभः प्रवर्तते" एतदनुसारेण लोभवृद्धौ शान्त्या वंचितो भवति मनुष्यः। अतएव तृष्णामूलिकानां सकामप्रवृत्तीनां सर्वथा त्यागः शास्त्रेषु समुपदिष्टः। केऽपि महानुभावा विहितप्रवृत्तीनां त्यागं नानुमन्यन्ते। तेषां विचारे कर्मसु तृष्णायाः स्थितिरेव बन्धनहेतुरस्ति या फलत्यागेन निवर्तते। तदा चित्तस्य व्यग्रता न जायते। अतएवैषां विहितसकामकर्मणां त्यागस्य नास्त्यावश्यकत्वम्। कर्ममार्गे उभयमपि मतमिदं संन्यासत्यागसंज्ञाभ्यां परिचितमस्ति। तदुक्तम्—

"काम्यानां कर्मणां न्यासं संन्यासं कवयो विदुः।
सर्वकर्मफलत्यागं प्राहुस्त्यागं विचक्षणाः॥"
[गीता० १८-२]

२६. मुमुक्षुसाधकानां कृते कर्मविषये नित्यनैमित्तिककाम्य-निषिद्धप्रायश्चित्तरूपाणां पञ्चविधकर्मणां सङ्गतिरेव क्रियते। नित्य-मनुष्ठेयानि स्नानसन्ध्यादीनि कर्माणि नित्यान्युच्यन्ते। पार्वण-श्राद्धादीनि नैमित्तिकानि, वृष्ट्येच्छया कारीरी, पुत्रेच्छया पुत्रका-मेष्ट्यादीनि काम्यानि, ब्राह्मणहननसुरापानादीनि निषिद्धानि, निषिद्धकर्माचरणैर्जायमानदोषदूरीकरणार्थं प्रायश्चित्तकर्माणि शास्त्रेषु विहितानि। काम्यनिषिद्धप्रायश्चित्तकर्मणां तु स्वरूपतस्-त्यागो भवति, नित्यनैमित्तिककर्मणामाचरणमन्तःकरणशुद्धिसाधन-तया परमात्मज्ञाने हेतुतां प्रतिपद्यते। अतस्तस्याचरणमावश्यकं भवति।

२७. काम्यानां कर्मणां विषये ज्ञानिनो वदन्ति यन्निषद्ध-कर्माचरणैर्विमुखीकरणायैवैतेषां विधानं विद्यते, यथार्थतया तन्नास्ति यतो हि मुमुक्षोर्मार्गे एतैर्महान् प्रतिबन्धो भवति। सकामो मनुष्यः स्वीयसमस्तभिलाषपूर्त्तये ईश्वराद् विभिन्नदेवेभ्यश्च प्रार्थनां करोति वास्तविकोद्योगाद् विमुखीभावस्य चाभ्यासी जायते। "कृपणाः फलहेतवः"—इत्येतस्मिन् इदमेव तत्त्वं कथितमस्ति। तेन श्रद्धा-विश्वाससन्तोषादयः शुभगुणास्तं परित्यजन्ति अन्ते च स मनुष्यः पतितकोटौ प्रविष्टो भवति। योगिप्रवरेणारविन्देन स्वीयो विचारः विषयेऽस्मिन्नत्यन्तसारगर्भितशब्देष्वेवं सम्प्रकाशितः—

But the supreme grace will act only in the condition of light and the truth, it will not act in the condition laid upon it by the falsehood and the ignorence. For if it were

to yield to the demands of the falsehood, it would defeat its own purpose. [The Mother 1-2]

अर्थात् दिव्या शक्तिः प्रकाशस्य सत्यस्यैव चावस्थायां कार्यं करिष्यति। अज्ञानस्य असत्यस्य चावस्थायां यः स्वीयाभिलाषं तदुपर्यारोपयिष्यति, तस्यामवस्थायां सा स्वीयं कार्यं सम्पादयितुं न शक्नोति। यदि प्रार्थयितृणामेतादृशाभिलाषमपि सा पूरयेत् तदानीं सा स्वीयाया दिव्यताया विच्युता स्यात्। तस्यामवस्थायामज्ञाने विद्यायां च को भेदो भवेत्, यतो तस्यामवस्थायां तादृशाचरणेन दिव्याशक्तिरप्यज्ञानस्यैव रूपान्तरतामापद्येत। अतएव कामनायुक्ता प्रवृत्तिरपि निषिद्धकोटावेवास्ति। "स शान्तिमाप्नोति न काम कामी" इत्येतस्मिन् वाक्ये निषिद्धकोटावेव काम्यकर्माणि गृहीतानि।

२८. यः पुरुषो यस्याः कस्या अपि साधनप्रणाल्या अधिकारी भवति स तयैव आत्मकल्याणं शान्तिमभ्युदयं प्राप्तुं शक्नोति। एतस्य निश्चयेन विना अन्धपरम्परया गमनेन मनुष्यः साधनाया उत्तरोत्तरं दम्भी भवति, अथवा मनोभिलषितपदार्थस्याप्राप्तौ तस्य कर्मणो विरोधी सञ्जायते साधनायां च दोषारोपणं कर्तुमारभते। प्रायो दृश्यते यद् बहवः प्रतिष्ठाभिलाषिणो मनुष्याः भक्तमण्डल्यां सम्मिलन्तो भगवद्गुणानुकीर्तनवेलायामावेशवशात् कतिपयाश्रुविन्दूनां नेत्रयोः प्रदर्शनमात्रेण भक्तिभावनाया इतिश्रियं कृत्वा स्वात्मानं कृतकार्यं मन्यन्ते। आवेशापगमे च पुनर्यथावदेव तिष्ठन्ति। बहवः पुरुषाः स्वीयविषयभोगार्थं अथवाऽस्मत्प्रतिष्ठा सुरक्षिता स्यात्, जनाः मामपि परमार्थमार्गस्य पथिकं जानीयुरित्येतदर्थमन्यां साधनप्रणालीं दूषयितुं तत्परा विलोक्यन्ते। एषैव वार्ता ज्ञानिनां कर्मिणां योगिप्रभृतीनामपि विषयेऽनुसन्धेया। यथार्थतयेता अनधिकारचेष्टाः सन्ति, एताभ्य उन्नतिर्न जायते, अधोनिपतनमेव

भवति। साधकैरवधेयं यत् तेषां साधनैतस्मिन्मार्गे तु न गच्छति। सर्वदैवैतन्निरीक्षणीयम्। बहवः पुरुषाः योगसदृशे पवित्रविषये दोषारोपणं कुर्वन्तो दृष्टाः, बहवश्च मन्त्रतन्त्रं मिथ्या जालयुक्तं घोषयन्तो दृश्यन्ते। वेदशास्त्रसाधुमहात्मदेवीदेवांश्च मिथ्या वदन्तोऽपि बहवो दृष्टाः। एतस्य कारणं मनुष्यस्य क्षुद्रा स्वार्थपरतैवास्ति या हि पूर्वोक्तं सर्वं स्वानुकूलं दृष्ट्वा निन्दायां तत्परो भवति तद्विचारानुसारं तु सर्वापीयं सृष्टिर्मनुष्यस्य विचारमनुसृत्यैव निर्मिता आभाति। यथा कोऽपि कफदोषग्रस्तावस्थायां दुग्धसदृशं सुन्दरं स्वादिष्टं च पदार्थं सदोषं कथयेत्, स एव पुनः पित्तदोषावस्थायां तस्यैवोपयोगित्वं साधयेत् तदानीं किं तस्य निर्णयेन दुग्धस्वरूपनिर्णयः समीचीनो मन्तुं शक्यते। किमेतस्यामेव निन्दाप्रशंसायां पदार्थस्य स्वरूपं स्थितमस्ति? यथायं निर्णयोऽनुपयुक्तस्तथैवोक्तविषयेऽप्यवगन्तव्यम्, यतोहि अनधिकारावस्थायां निर्णयः निर्णयो न भवति।

२९. त्रयोविंशे मणौ सत्संगस्य चर्चा कृताऽस्ति तस्यैवात्र कथनं क्रियते। आर्यग्रन्थेषु सत्संगः अत्यन्तं हितसम्पादकः भगवत्कृपालभ्यश्च कथितः, तथापि सत्संगोऽत्यन्तं दुर्लभं वस्तु विद्यते। अनेकधा सत्संगं मत्वाऽपि मानवः कुसंगस्योपक्रमं करोति तथाप्यज्ञतावशात्तं सत्संगमेव मनुते, अतएव यो लाभः प्राप्तव्यस्तं स न प्राप्नोति। अनेके दम्भयुक्ताः पुरुषा सत्संगनाम्ना दम्भं विस्तारयन्ति, अनेके जीविकार्थं सत्संगिरूपं धारयन्ति, अनेकेऽनधिकारिणः पुरुषाः सतां महतां वेशे सत्सङ्गस्य नाम्ना सरलसरलान् जनान् वञ्चयन्ति, अनेके सत्संगनाम्ना नैतिकं षड्यन्त्रं [politicalpropaganda] कुर्वन्ति। यद्यपि एता वार्ता नवीना न सन्ति तथापि वस्तुतः सत्सङ्गस्य निर्णयोऽवश्यं साधारणबुद्धिशालिनां कृतेऽस्मिन् समये दुर्गम्यो विद्यते। अतएवायं दुर्लभः कथितः।

३०. दूषितकर्मभ्योऽरुचिः, वासनानां परित्यागः, पूज्यपुरुषेषु भक्तिः, सत्सिद्धान्तानामाचरणम्, सारल्यम्, निष्कपटभावे सविशेषा रुचिः, भोगेष्वरुचिर्यदा यदा भवेत् तदा ज्ञातव्यं यन्मां सत्सङ्गः प्रभावयति। एता वार्ता यदा प्राप्ताः स्युस्तदा ज्ञातव्यं यत् यथार्थतया सत्संगोऽयमेवाऽस्ति। यान् अलभ्याननुभवान् महात्मानोऽनेकेषु वर्षेषु महता काठिन्येनासादयन्ति ते सत्संगेषु सुलभतया संप्राप्यन्ते, अतएवैतस्य महत्त्वं सर्वेषु मान्यग्रन्थेषु सम्प्राप्यते। अनेन चित्तस्य स्थिरता, ज्ञानशक्तेरुदयः, ईश्वरे प्रेम, सत्सु पूज्यभावः अनेकेषां विषयाणां परिचयः, पारिमार्थिकेषु विषयेषु श्रद्धा तेषां रहस्यज्ञानं संसारस्यासारताया निश्चयश्च सुगमरीत्या सञ्जायते। सत्संगं विना मनुष्यस्य जीवनमनुभवशून्यं निरर्थकं च कथितम्।

३१. पूर्वं मन शुद्धिविषये सङ्केतो विहितः। तस्यैव विषयस्योपरि महर्षेः पतञ्जलेः सम्मतिरेवं विद्यते—

"मैत्रीकरुणामुदितोपेक्षाणां सुखदुःखपुण्यापुण्यविषयाणां भावनातश्चित्तप्रसादनम्" [योगसूत्र १–३३]। मैत्री करुणा-मुदितोपेक्षा च सुखदुःखाभ्यां पुण्यापुण्यविषयैश्च सम्बद्धास्तासां क्रमशो भावनया चित्तस्य प्रसन्नता संजायते। सुखिना सह मैत्री, दुःखयुक्तेन सह करुणा, पुण्यात्मना सह मुदिता प्रसन्नता वा, दुष्टैः सह उपेक्षा अर्थात् प्रीतिद्वेषाभावः, एतेषां यथार्थाचरणेन चेतसि प्रसन्नता जायते। संक्षेपे गीतायामिदमेव तत्त्वमस्मिन् श्लोके एवमुक्तम्—

'रागद्वेषवियुक्तैस्तु विषयानिन्द्रियैश्चरन्।
आत्मवश्यैर्विधेयात्मा प्रसादमधिगच्छति॥"

[गी० २-६४]

रागद्वेषाभ्यां विरहितो भूत्वा मनोऽधीनैरिन्द्रियैर्विषयाणामुपभोगं कुर्वन् मनुष्यः प्रसन्नतां प्राप्नोति। योगसूत्रे यत् तत्त्वमुक्तं

तस्यैव व्यावहारिकी स्थितिरत्रश्लोके कथिता, वस्तुतस्तस्यामेवावस्थायां मनस उच्चावस्थायाः परिचयो भवति।

यतो हि व्यवहारं विना कस्यापि वस्तुनः परिचयोऽपूर्ण एव तिष्ठति। जीवन्मुक्तस्य व्यवहारस्तादृश एव भवति। ईदृशो व्यवहारः आत्मसाक्षात्कारादेव निष्पद्यते। रागद्वेषाभावः आत्मज्ञानेनैव भवति। "परं दृष्ट्वा निवर्तते" वचनेऽस्मिन्निदमेव कथितमस्ति।

३२. ये महानुभावा कर्मोपासनाज्ञानानामेतेषां त्रयाणामपि मार्गाणां रहस्यं ज्ञातवन्तस्तेषां चित्ते स्वभावतः करुणादयोपकारप्रेमादिशुभगुणानां प्रवाहः प्रचलितो भवति। त एव "सर्वभूतहिते रताः" एभिः शब्दैः गीतायां कथिताः। भगवता वासुदेवेन–"ज्ञानी त्वात्मैव मे मतम्" इति कथितम्। यथा स समये समये अज्ञानिनो जनान् शिक्षयितुं प्रादुर्भवति, तादृश एव व्यवहारस्तेषां सिद्धपुरुषाणामपि भवति। तमेव लोकसंग्रहं वदन्ति। स्वस्वभावनानुसारं तं कर्मयोगिनः पुरुषाः कर्मयोगिनं कथयन्ति, भक्ता भक्तं व्याहरन्ति, ज्ञानिनश्च तं परमज्ञानिनं स्वीकुर्वन्ति। वस्तुतस्तिसृणामप्यासां साधनानां फलं जीवन्मुक्तपुरुषे एव दृश्यते, तेषां केनापि सह विरोधो न भवति, सर्वत्र समता समायाति।

"इहैव तैर्जितः सर्गो येषां साम्ये स्थितं मनः" जीवन्मुक्तः पुरुषः जीवनकाल एव गुणानामुपरि विजयं प्राप्नोति, यतो हि तदीयं मनः समत्वे वर्तमानं तिष्ठति। तेषां बाह्याचरणान्यवश्यं विभिन्नानि भवन्ति किन्तु वास्तविकी एकता तत्र तिष्ठति। तेषां बाह्याचारानवलोक्याज्ञानिनो जनाः सन्दिहानाः जायन्ते तथाप्येतेन तेषां कापि हानिर्न भवति। तेषामेव महात्मनां नाम्ना अनेके पन्थानः संसारे प्रवर्त्यन्ते, तथापि तेषां महात्मनामपि तादृशो सम्मतिरस्तीति निश्चयेन न वक्तुं शक्यते, यतो हि मतवादानां दुरुपयोगः पर्याप्तरूपेण सञ्जातः।

३३. सत्पुरुषाः कस्या अपि जातेः कुलस्य देशस्य चापेक्षां कृत्वा न समुत्पन्ना भवन्ति। तेष्वेतादृशस्य भेदस्य स्वीकारोऽपि नोचितः। वस्तुतस्तेषां परिचयस्तु त्यागेन भवति। येन केनापि महापुरुषेण यावती श्रेष्ठता सम्प्राप्ता तत्र सर्वमपि श्रेयस्त्यागस्यैवास्ति। अतः सत्पुरुषाणां परिचयस्यायमेव निकषो भवति। चैतन्यः, बुद्धः, नानकः कबीरः, यीशुख्रिष्टः मुहम्मदश्चात्र प्रमाणभूताः सन्ति। निकषमेवं त्यक्त्वा बाह्यवस्तून्यधिकृत्य विवादकरणं व्यर्थमज्ञानं चास्ति।

३४. यावन्तो धर्माः कथितास्तेष्वहिंसैव परमो धर्मो विद्यते। अहिंसकभावं विना मनुष्यस्य कीदृशमपि सदाचरणं कुञ्जरशौचवदेवास्ति। यः कमपि प्राणिनं स्वार्थवशान्न पीडयति, सर्वं जगद् यः प्रेमपूर्णेन चक्षुषा पश्यति स एव यथार्थतोऽहिंसावादी भवति।

३५. सत्याहिंसाक्षमापरोपकारादिसात्त्विकगुणानां परिपालनाय सदैव श्रेष्ठपुरुषा आदिशन्ति, तथापि देशकालपरिस्थितीनां परिवर्तने नैतेषामाचरणे भेदो भवति, यतो हि यद् वयं सामान्यतया सत्यमसत्यम्, हिंसामहिंसाम्, क्षमां क्रोधं, परोपकारमनुपकारं वा जानीमः, यदा तदा तेषां स्वरूपं परिवर्तितं भवति, तस्मिन् तेषां स्वरूपं विपरीतमेव ज्ञायते। अतएवास्य सदाचारस्यापवादा अभ्युपस्थिताः जायन्ते। यदा तदा यदसत्यरूपेण ज्ञातमस्ति तदेव सत्यं हितकरं च जायते। राज्ञो विराटस्य सविधे पाण्डवानां स्वपरिचयादानम्, परशुरामस्य पितुराज्ञया स्वमातुर्मारणम्, पृथ्वीराजस्य मुहम्मदगोरीं प्रति क्षमाकरणम्, धृष्टद्युम्नाय द्रोणाचार्यस्य विद्याप्रदानमित्येवमादिषु तथा दृष्टम्। तथापि महात्मनां निर्णय ईदृशो नास्ति, तेषां मतेन तु सदैवैतेषां पालनं करणीयम्।

३६. लोकप्रतिष्ठया स्वार्थेन हिंसद्वेषादिभिर्दोषैर्येषां चेतः दूषितं न भवति, तेषामेव पुरुषाणामन्तःकरणे धर्मस्य स्वरूपं प्रकाशितं

भवति। तेषां यानि वचनानि तान्येव शास्त्राण्युच्यन्ते। "महाजनो येन गतः स पन्थाः" उक्तिरियं तेष्वेव शास्त्रेषु घटते--

"तस्माच्छास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ"

अर्थात् किं करणीयं किं न करणीयमितिविषये शास्त्रमेव प्रमाणमस्ति। गीतायाः संकेतोऽयमुपर्युक्ताभिप्रायवतां शास्त्राणां प्रत्येवाऽस्ति।

३७. अपस्वार्थः, ईर्ष्या, द्वेषः, दूषणम्, लोभो येषामन्तःकरणे तिष्ठति अन्यस्य कस्याप्युत्कर्षो येषां सह्यो न भवति, लोकहितकार्येऽपि ये स्वार्थं साधयन्ति, एवं कर्तुमपारयन्तो ये दूषयितुं तत्परा भवन्ति, एतादृशैर्मनुष्यैर्धर्मस्य व्यवस्थाया याचनं ग्रहणं च वस्तुतो मूर्खतैवास्ति।

३८. यस्मिन् देशे समाजे वा देशकालपरिस्थित्यनुसारेणाचरणीयस्य धर्मस्य विवेचनकर्तारो न भवन्ति स समाजः देशोवाऽधःपतनं प्राप्नोति, यतो हि विप्रलम्भकाः, प्रतिष्ठाकामिनः, मानिनः, इन्द्रियपरायणा विषयारामाः पुरुषा एव तस्य देशस्य तस्मिन्काले नेतारो भाग्यनिर्णायकाश्च जायन्ते। तेषां मुख्यं कार्यं सत्यप्रकाशकानां महात्मनां निरोधः, तेषामुपरि विविधमिथ्यालाञ्छनानां योजनम्, मूकप्रजायाश्च स्वस्वार्थानुकूलपरिचालनं भवति। यदि कोऽपि धार्मिकः पुरुषः स्वसिद्धान्ते दृढः स्यात् तदा तस्य वध एव सम्पाद्यते। महात्मनो यीशुख्रिष्टस्य सुकरातादीनामेवंविधा दृष्टान्ता इतिहासग्रन्थेषु प्राप्यन्ते। शङ्कररामानुज-चैतन्य-वल्लभ-दयानन्दादिभिः सह यद् घटितं तदितिहासाध्येतृणां परोक्षं नास्ति। तथापि तादृशैः पुरुषैरेतेषां महात्मनामुपर्यन्याये जातेऽपि एतेषां न कापि क्षतिर्जाता, यतो हि ते तु मृत्युभयात् सर्वथैव मुक्ता आसन्, अपितु तेषां बलिदानैरुदाहरणग्रहीतृणां कृते यथेष्टं प्रमाणमुपस्थितं जातम्, येन धर्ममार्गे प्रवृत्ताः पथिकाः सदैव तेषामादरेण स्मरणं करि-

ष्यन्ति। धर्मं परित्यज्यापितु कस्मिन्नपि दिवसे मृत्युमुखे प्रवेष्टव्यमेव भविष्यति तदा पुनः किमर्थं धर्मपथाद्विचलनीयम्, एतदेव भवति तेषां जीवनस्य परमो मन्त्रः, त एव यथार्थतया धार्मिकाः पुरुषाः कथ्यन्ते। यथार्था महात्मानः पंचतत्त्वात्मकेऽस्मिन् काये स्थितिमकुर्वन्तोऽपि जगद्धितं स्वकृतोदाहरणैः कुर्वन्त्येव। ते तु मृत्योः परं स्वीयमात्मानं सदैव पश्यन्ति। अतएव मृत्योर्भयं तान् स्वसिद्धान्तात् कदापि न विचालयितुं समर्थम्। गुरोस्तेगबहादुरस्य गुरुगोविन्दसिंहस्य पुत्रयोश्च लघोयसोर्वृत्तान्तोऽत्र ज्वलदुदाहरणमास्ते।

३९. खलपुरुषाणां बुद्धौ दोषा नितान्तं शीघ्रतया प्रविशन्ति। जलस्य प्रवाहो निम्नभूप्रदेशे एव भवति। मक्षिका शरीरे व्रणानामेवोपरि लक्ष्यं करोति। दुष्टप्रकृतिकः पुरुष ईदृश एव भवति। खलपुरुषः शोभनानुपदेशान् कामं ते कियत्यामपि शोभनायां भाषायां भवेयुः, दूषितानेव मनुते। यदा कदैतादृश स्वभाववान् पुरुषः समाधेर्योगस्य भक्तेर्वेदान्तस्य वार्ता अधिगम्य मण्डलीषु स्थित्वाऽत्मानं पर्याप्तरूपेण सत्संगिनं दर्शयति, यदा कदा वेदपुराणोपनिषदादिग्रन्थानामुद्धरणानि दत्त्वा स्वात्मानं सर्वज्ञं विद्वांसं साधयितुमुपक्रमते, यदा कदा सतां महात्मनां वेशेऽप्यात्मानं प्रदर्शयति, कदाचित् लेखकस्य व्याख्यातुर्वा रूपेऽपि वयं तं पश्यामः। तथापि सत्यप्येवं प्राप्तेऽवसरे तस्य वास्तविकं रूपं प्रत्यक्षीभवति। बाह्यो वेशः, यथा शिरोमुण्डनम्, जटाधारणम्, कषायवस्त्रधारणम्, तिलकधारणमित्येतत्सर्वं वास्तविकीं दुष्टतां गोपयितुमलं न भवति। एतान् वेशाँस्तु दुष्कर्मकर्तारोऽपि दुष्टतासम्पादनाय स्वीकुर्वन्ति। सीताहरणकाले रावणेनापि यतिवेशधारणं कृतम्, कालनेमिनाऽपि हनुमद्वञ्चनाय मुनिवेशो धारितः, तथापि वास्तविकी स्थितिर्न परोक्षे स्थिता—

"उघरहिं अन्त न होइ निबाहू।
कालनेमि जिमि रावण राहू॥" [गो०तुलसीदासः]

४०. दुष्टपुरुषा सर्वदैव सत्पुरुषैरकारणं वैरं कुर्वन्ति। अयं स्वभावस्तेषां सर्वैरेव सह यद्यपि भवति तथापि तेषां प्रधानाः शत्रवः सज्जनपुरुषा भवन्ति। एते पुरुषास्तेषामपकीर्तिं यत्र तत्र विस्तारयन्ति तांश्च पातयितुमिच्छन्ति, परन्तु उपायेनानेन तेषां प्रसिद्धिर्वर्धत एव, योग्यपुरुषाणां च दृष्टौ तेषां महत्त्वं प्रकटितं भवति। विषयेऽस्मिन् महात्मना कबीरेणातिसुन्दरमुक्तम्—

"निन्दक नियरे राखिये आँगन कुटी छवाय।
बिन पानी बिन साबुना सहजहि करत सुभाय॥"

धन्याः सन्ति ते महात्मानो ये दुष्टादपि सुशिक्षामेव गृह्णन्ति।

४१. यस्य चित्तं नास्ति शान्तम्, विषयेभ्यो यो नास्त्युपरतः, सांसारिकाया मानप्रतिष्ठाया योऽभिलाषो वर्तते स कामं बहुपुस्तकानामध्ययनं कुर्यात्, लेखकानां मध्ये मान्यत्वमासादयेत्, व्याख्यातृषु वाचस्पतिर्भूयात्, बाह्यैश्चिह्नैः संसारे महात्मरूपेण प्रसिद्धो भवेत्, तथापि स शान्तिं प्राप्तुं न शक्नोति।

४२. येषु श्रद्धाविश्वासौ, येषां चेतः सदैव भ्रमणशीलमस्ति, अद्य कस्यचित् सविधे कापि वार्तां पृष्टा, पुनःश्व एव तद्विपरीतं कर्म प्रारब्धम्, केवलमुच्चोच्चवार्ताकरणमेव येषां स्वभावः, कुतश्चित्—दृष्येकावार्तां ज्ञाता तदा तदाधारेणैव शास्त्रार्थकरणे प्रवृत्ताः, कस्यापि विदुषः सत्पुरुषस्य परीक्षाकरणे प्रवृत्ताः यदेते वार्तामिमां जानन्ति न वा, अद्य कस्यापि पूजनम्, श्वः पुनरन्यदेवाचरणम्, केवलं स्वनाम्नः प्रसिद्धिभावनया परमार्थमार्गे प्रवृत्तिरित्यादयो वार्ताः येषां स्वभावभूतास्ते वास्तविकीं शान्तिं न कदापि प्राप्तुं शक्नुवन्ति। गीतायां तादृशेभ्य एव मनुष्येभ्यः कथितं यत्—

"अज्ञश्चाश्रद्दधानश्च संशयात्मा विनश्यति।"

ये अज्ञाः, श्रद्धारहिताः, संशयग्रस्तचित्तास्तेषां विनाशो जायते। विश्वासस्य महत्त्वे कुलार्णवतन्त्रे उक्तम्—

"विश्वासाय नमस्तस्मै सर्वसिद्धिप्रदायिने।
येन मृद्दारुहृषदः फलन्त्यविकलं फलम् ॥"

अर्थात् येन मृत्-दारु, पाषाणाश्चापि निश्चिते फलदाने समर्थास्तस्मै सम्पूर्णसिद्धिदायिने विश्वासाय नमः।

४३. केनापि पृष्टं सर्वज्येष्ठं साधनं किमस्ति यदुपरि विश्वासः दृढः क्रियेत ?

उत्तरम्—येनात्मकल्याणं भवेत्, दूषितवासनानां दमनं स्यात्, यदात्मसाक्षात्कारे भगवत्साक्षात्कारे च हेतुभूतं स्यात् तदेव साधनं सर्वज्येष्ठमस्ति। साधनप्रणाली शैववैष्णवशाक्तकर्मज्ञानादिभेदैरनेकप्रकारास्ति, या यथार्थतया उपर्युक्तमेव लक्ष्यं साधयति। प्रायशोऽज्ञानिनो भेदममुं दृष्ट्वा कलहायन्ते यदस्माकमेव साधनप्रणाली सत्या सर्वोपरि चास्ति। तथापि वार्ता तादृशी नास्ति। यो यस्या अधिकारी अस्ति सा साधना तत्कृते सर्वोपरि विद्यते। वस्तुतः गुणपरिचयाभावे तादृशः प्रश्नः समुदेति।

४४. यत् साधनं भगवत्कृपया सद्गुरुकृपया वा सम्प्राप्यते तदेव मनुष्यस्य कल्याणसम्पादकं भवति। साधकः पूर्णास्थया तस्याऽवलम्बनं कुर्यात्। तत्र कदापि संशयो नोदियात्। यदि कश्चिदपि सन्देहस्तत्र भविष्यति तदा साधनया न कोऽपि लाभो भविष्यति, यतो हि सन्देहः सर्वेषां साधनानां विनाशको भवति।

४५. मनुष्यः स्वशुभाशुभकर्मणां मिश्रणानुसारमस्मिन्संसारे समायातः। परं यथार्थलक्ष्यज्ञानाऽभावे स भ्रान्तोऽस्ति, मुक्तेरुपायं करोति किन्तु अधिकाधिकं जाले पतति। अनेकानि मतमतान्तराणि दृष्ट्वा तेषां वैलक्षण्येन निश्चयमपि कर्तुं न पारयति यत् तेषां यथार्थं रूपं किमस्ति किमर्थं च तेषां स्वीकारोऽस्माभिः करणीय इति। बहवस्तु विचारं विनैव मतविशेषाभिमानप्रदर्शने

स्वीयं गौरवं दर्शयन्ति, आचरणधर्मैश्च शून्याः सन्तोऽपि धर्मस्य मिथ्याप्रदर्शनं कृत्वाऽत्मानं वञ्चयन्ति। अनेके निन्दास्तुतिपाठमध्यापयन्ति, स्वीया प्रशंसा, अन्येषां मतानां निन्दैव तस्य वास्तविकं लक्ष्यं भवति। किमधिकम्, शास्त्रेष्वपीदृश्यो वार्ताः स्थापिताः सन्ति। यदि विचारकालः समुपस्थितो भवति तदेमा वार्तास्तत्र प्रमाणतयोपस्थाप्यन्ते। ईदृश्यामवस्थायां यथार्थः पन्थाः कः, तस्य निर्णयोऽसम्भवः सञ्जायते। प्रतीयते यदेतत्सर्वं दृष्टैव सद्भिरुक्तं यत् भगवत्कृपां विना समुद्धारो न सम्भवति। यतो हि सैव सन्देहैरेतादृशैरतिक्रान्ताऽस्ति। सा कदा प्राप्स्यत इत्यस्य कोऽपि निश्चयो नास्ति।

४६. हठ आग्रहश्च वस्तुतोऽत्यन्तां हानिं सम्पादयतः, हठिनं पुरुषं विविधास्वापत्सु पातयतः। यदा मनुष्यः कस्मिंश्चिदनौचित्ये भवत्याग्रहशीलस्तदैव विचारशक्तिस्तं परित्यजति। विवेकाऽभावे पतनं सञ्जायते—"विवेकभ्रष्टानां भवति विनिपातः शतमुखः" शतधा भवति पतनं विवेकभ्रष्टानाम्। परं सत्ये श्रद्धायां सदाचारे हठे जाते मनुष्यस्योन्नतिर्भवति। यतो हि स एव तस्यामवस्थायां विचारशक्तेः परिमार्जकः सञ्जायते।

४७. शौचस्यानुष्ठानमत्यन्तमावश्यकमस्ति। शौचं द्वेधा भवति—एकं मुख्यम्, द्वितीयं गौणम्। शुद्धविचारेण सदाचारस्य पालनेन हिंसाद्वेषभयादीनां त्यागेन च मुख्यं शौचं जायते, मृत्तिकया जलादिना च गौणो बाह्या वा शुचिता भवति। यस्मिन् काले-ऽशुद्धो विचारो मनसि समुत्पन्नो भवति तदानीं तस्य वृद्धिरत्यन्तं शीघ्रतया भवति। यथा जले एकस्मिन् प्रस्तरखण्डे प्रक्षिप्ते सति लहर्यः समुत्पद्य समस्तं जलाशयं क्षुब्धं कुर्वन्ति तथैवायं विचारोऽनेकानि रूपाणि धारयति। तदानीं धैर्यं सहनशक्तिश्च विलुप्यते। यथार्थतया जलाशयवदेव स्थिरता नश्यति, अन्तःकरणं च भवति

विक्षुब्धम्। तेषामावेशानामेव वशीभूय मनुष्यो: नितान्तं निन्दितानि कार्याणि समाचरति। अनेकेषां रोगव्याधीनामपि इमान्येव कारणानि भवन्ति। क्रूरता-कठोरता-निर्लज्जतादय: पाशविका गुणा मनुष्ये समायान्ति, तदनन्तरं निन्देर्ष्याक्रोधकामादय: समुत्पद्यन्ते महानाशस्य च सामग्री संघटिता जायते, स पुरुषश्चान्ते नरकगामी भवति। अतएवेदमेव शौचं मुख्यतया साधकेन करणीयम्। बाह्यं शौचं तु प्रदर्शनशीला अपि संसारस्य वञ्चनार्थं कुर्वन्ति। शौचस्यार्थ: परेषां घृणादृष्ट्याऽवलोकनं नास्ति परमशुद्धानां पतितपुरुषाणां धैर्यसान्त्वनादिशुभगुणै: शुद्धीकरणं पापाचरणात्तेषां मुक्तिश्च विद्यते। अतएवोक्तम्—"Hate the sin, But love the sinner"—अर्थात् पापाद् घृणा करणोया, परं पापिना प्रेम कार्यम्, यथार्थत: इयमेव यथार्था पवित्रताऽस्ति। अस्यार्थोऽयं कदापि न ग्रहीतुमुचितो यद् बाह्यं शौचमनुपयुक्तं भवति, तस्याप्याचरणं मनश्शुद्धेर्हेतुरस्ति, तथापि विचारद्वाराऽन्तरिकशुद्धिं विना तेन कोऽपि लाभो न भवति। विचारपूर्वकं बाह्यशौचस्याप्याचरणं लाभप्रदं भवति। अतस्तस्योपरि ध्यानदानमावश्यकम्।

४८. यथा स्वर्णमग्नौ तापनेन शुद्धीभूय प्रकाशते तथैवाहिंसा-ब्रह्मचर्य-परोपकार-दान-सत्पुरुषसेवा-गुरुसेवा-देवपूजनादिभिर्व्यापारै: शारीरदोषा नश्यन्ति, तदिदं कायिकं तप उच्यते। सत्यप्रियहितभाषणम्, मन्त्रजप:, वेदानां स्वाध्यायादयो वाचिकानि तपांस्युच्यन्ते। मनसो नैर्मल्यं, तस्यासूयादिदोषराहित्येन शुद्धविचारपूर्णत्वसम्पादनम्, मन्त्रस्यमानसिकजपकरणम्, ध्यानाऽभ्यासादयो मानसिकतपांस्युच्यन्ते। एवं यस्त्रिविधतपोऽनुष्ठानं करोति स एव यथार्थस्तपस्वी भवति। प्राचीनकाले तस्यैतस्याचरणस्य कृते एक: स्वतन्त्र आश्रम एवासीद्यो वानप्रस्थ उच्यते।

४९. यावन्त्यपि साधनानि शास्त्राणि च महात्मानो बोधयन्ति

तेषां सर्वेषामपि सिद्धिर्ब्रह्मचर्यं एवावलम्बते। यः पुरुषः कामुको विद्यते स कीदृशीमपि उत्तमां साधनां प्राप्नुयात् परं स सिद्धिं प्राप्तुं न शक्नोति। यावन्तोऽपि सूक्ष्माः दैवाः व्यावहारिकाश्च प्रभावाः सन्ति ते सर्वतः प्रथमं पूर्णसंयतवीर्यवति पुरुष एव स्वीयं प्रभावमुत्पादयन्ति। वीर्यलाभः ब्रह्मचर्येणैव भवति—"ब्रह्मचर्यप्रतिष्ठायां वीर्यलाभः"—योगसूत्रेऽस्मिन्नप्येतदुक्तम्। ब्रह्मचर्येणाशक्यान्यपि कार्याणि कर्तुं शक्यन्ते। हनुमद्भीष्मशंकराचार्यदयानन्दादिपुण्यपुरुषचरित्राण्येतस्य साक्षिभूतानि सन्ति। वेदविद्यासरस्वत्यपि ब्रह्मचारिणीस्वरूप एवोपास्या स्वीकृताऽस्ति। अत एव विद्यार्थिनां कृते ब्रह्मचर्यधारणं शास्त्रेषूपदिष्टम्। ब्रह्मचर्येण विना विद्यायाः प्राप्तिरसम्भवैवास्ति, ब्रह्मचर्यस्य विनाश एव वेदविद्याया लोपकः संजातः। विषयिनः कामुकस्य समीपे वेदविद्या स्थातुं नैव शक्नोति। यतो हि प्रकाशान्धकारवदुभयोर्विद्यते विरोधः। आलस्यः, प्रमादः, कुचेष्टादयो दुर्गुणा ब्रह्मचर्यस्याभाव एव समुत्पद्यन्ते। धैर्यस्य नाशः ब्रह्मचर्यस्य विनाशे एव संजायते। अतएव यान्यपि गम्भीराणि-विचारात्मकाणि कार्याणि सन्ति तानि कामुको न कर्तुं शक्नोति। यथार्थः परिष्कारो ब्रह्मचर्यादेवारब्धो भवति। तं त्यक्त्वा पुस्तकानां केवलमभ्यासो व्यर्थतातिरिक्तं कीदृशीमप्यार्थिकीं समुन्नतिं न साधयति। शिक्षया सह ब्रह्मचर्यस्य सम्बन्धोऽग्निदाह्योरिव नित्यो विद्यते। परमार्थस्य योगभक्त्यादिसाधना अप्यत्रैवावलम्बन्ते। कस्यापि योगिनः साधकस्य पतनं तदैव जातं यदा तेन कामिन्या उपरि दृष्टिनिक्षेपः कृतः।

"मरणं विन्दुपातेन जीवनं विन्दुधारणात्"

वीर्यस्य धारणमेव जीवनं तस्य पात एव मरणं भवति। अथवा —"ब्रह्मचर्येण तपसा देवा मृत्युमुपाघ्नत"—ब्रह्मचर्यरूपिणा तपसा देवैर्मृत्योरुपरि विजयः सम्प्राप्तः, एतेषां वचनानामयमेवाभिप्रायो

विद्यते। अद्यतनीषु क्रियासु याऽसफलता दृश्यते तस्य मुख्यं कारणं ब्रह्मचर्यस्याभाव एवास्ति। सद्विद्यानां विलोपः निर्लज्जताया आधिक्यं ब्रह्मचर्यस्याभावादेव भवति।

"कामातुराणां न भयं न लज्जा"

विना ब्रह्मचर्यं निर्भयता नैव समायाति। स्मर्तव्यं यत् निर्भयतायास्तात्पर्यमुच्छृङ्खलता नास्ति, नापीयं स्वतन्त्रतैव वक्तुं शक्यते। पूर्णं स्वातन्त्र्यं तु जितेन्द्रियेणैव सम्प्राप्यते। विविधापदानां सहनशक्तिः सम्प्राप्यते ब्रह्मचर्येणैव। यस्यापि वीरपुरुषस्य पराजयः संजातः स ब्रह्मचर्याद्भ्रष्टतायामेव जातः। वस्तुतः ब्रह्मचर्यमेव सर्वशिरोमणिभूतं साधनमस्ति। अत एवैतस्य पालने तद्विरोधिभावानां त्यागे चात्यन्तं सावधानैर्भाव्यम्।

५०. कस्यापि पुरुषस्य कृते उपदेशस्तदैव देयो यदा परीक्षया तस्याधिकारनिर्णयः कृतः स्यात्। यस्तावदुपदेष्टैवं न करोति तस्योपदेशा ऊषरनिक्षिप्तबीजा इव निष्फला जायन्ते। उपमन्यु-आरुण्यादीनां योग्यानां शिष्याणां परीक्षाद्वारेणैव योग्यता प्रकटिता जाता।

५१. यस्तावदुपदेशकः पक्षपातेन मलिनान्तःकरणवान् भवति यद्वा जीविकार्थं य उपदेशं करोति तस्य तादृश उपदेशः बालुकपुलिनवद् दुर्बलो भवति। तस्य श्रोता वक्तोभावपि हितयुक्तौ न भवतः। अद्यतने काले भृत्या अप्युदेशकार्यं कुर्वन्ति, महत्यो सभा अप्यायोज्यन्ते तथापि तेषां कोऽपि दृढ़ः प्रभावो न भवति। तस्य मूलकारणमुपर्युक्तमेवास्ति। किमुच्यते, साम्प्रतं जीविकायास्तादृशः प्रश्नः समायातो यदनेन किमपि धार्मिकं व्यावहारिकं वा क्षेत्रमसंस्पृष्टं नास्ति। अल्पमपि कस्यापि विषयस्योपरि किमपि वक्तुमिच्छा जायते तत्रैव जीविकोच्छेदस्य पापं भवति दृष्टिगोचरम्।

५२. यया शिक्षया दासताया: शृङ्खला दृढ़ा भवेत् मनुष्यो-दूषितवार्तानामभ्यासी भवेत्, अभिमानोऽहंकारो, घृणा, अहम्म-न्यता, स्वार्थपरायणता यया वृद्धिं प्राप्नुयु:, यथार्थतया सा शिक्षा न भवति। यथाशीघ्रं तस्यास्त्यागो विधेय:, तदैव दैशस्य जातेश्च कल्याणं भविष्यति।

इति प्रथम: खण्ड:

२. योगरत्नमणि ग्रन्थनम्

प्रकृत्या विचित्रैः परिणामैर्नानाविधा संकीर्णता समायाति मानवीयेषु व्यवहारेषु यया यथार्थमननुभूय मनुष्योऽज्ञानचक्रे निपतति। अतएव योगाचार्यैर्योगाभ्यासद्वारा तस्य शोधनरीतिरादिष्टा। मन्त्र-हठ-लय-राजभेदेन योगस्य चत्वारः प्रकाराः स्वीकृताः। एभिश्चतुर्भिः प्रकारैर्हृदयस्य शुद्धिः, परमात्मनः साक्षात्कारः, अणिमादिविविधसिद्धीनां संप्राप्तिश्च योगिनः संजायते, तदेतत्कथित मेषामाचार्यैः। सिद्धीनां प्राप्त्यपेक्षया चित्तस्य समता विषयेषु वैराग्यञ्चैव योगस्य मुख्यं लक्ष्यमस्ति। सिद्धयस्तु बाधिकाः सन्ति परमार्थस्य। सुयोग्य एव योगी सिद्धीनां यथार्थमुपयोगं कर्तुं शक्तो भवति। अतोऽस्मिन् विषये योगिनाऽत्यन्तं सावधानेन भाव्यम्। एतेषु मन्त्रयोग एव सर्वसुलभः स्वाभाविकश्चास्ति, अतस्तस्यैव प्रथमं ग्रन्थनं कुर्मः।

१. मननकरणात् त्राणं साधकस्य रक्षां वा यः करोति तं मन्त्रं वदन्ति। मन्त्रः सात्विकशुद्धभावानां बोधको भवति। एतस्याभ्यासेन मलिनतत्त्वविशिष्टे जीवस्योपाधौ शुद्धसात्त्विकभावस्याभिव्यक्त्या मलिनतयोत्पादितानां दोषाणां नाशः संजायते जीवभावनिवृत्त्यनन्तरं च ब्रह्मणः सान्निध्यं सम्प्राप्यते। अतएव साधकः सर्वप्रथमं मन्त्रस्याश्रयं गृह्णीयात्।

२. नाना विलक्षणशक्तिमतां मन्त्राणां जपस्य विधानं प्रत्येकस्मिन् साधक-सम्प्रदायेऽङ्गीक्रियते। वैष्णव-शैवशाक्तमतेषु नाममन्त्राणां बीजमन्त्राणां च जपः महत्त्वं धारयति। जपेनैव मन्त्रः सिद्धो भवति तेन चार्थस्य साक्षात्कारो भवति। तथापि जपनियमानां तस्य विभिन्न रीतीनां च परिज्ञानाऽभावे मन्त्रजपः सफलो न भवितुमर्हति। प्रत्येकस्य मन्त्रस्य स्वरार्थच्छन्दोविनियोगज्ञानपूर्वकं

जपेनैव साफल्यं भवत्यन्यथा विपरीतमपि फलं जायते। जपः त्रिप्रकारो भवति वाचिकः, उपांशुः मानसश्च। यस्मिन् जपे शब्दः स्पष्टोच्चारणपूर्वकं ध्वनिना सह श्रूयमाणो भवेत्, स वाचिकः कथ्यते। यस्मिन् जपे शब्दस्तु न श्रूयते, केवलं वागिन्द्रियक्रियया ओष्ठमात्रस्य स्पन्दनं भवति स जप उपांशुः कथ्यते। यस्मिन् काले-ऽर्थज्ञानपूर्वकं साधको मनसैव जपं करोति स मानसिको जप उच्यते। वाचिकादुपांशुस्तस्माच्च मानसो जप उत्तमो मतः।

"तस्य वाचकः प्रणवः तज्जपस्तदर्थभावनम्"

परमात्मनो वाचकः प्रणवोऽस्ति तस्य जपस्तदर्थस्य च भावना करणीया। एवं महर्षिपतंजलिना योगविघ्नानां दूरोकरणाय पर-मात्मनोऽनुग्रहप्राप्तये च मन्त्रश्रेष्ठस्य ॐकारस्य जपविधानं कृतम्।

"ओमित्येकाक्षरं ब्रह्म व्याहरन् मामनुस्मरन्"

इति गीता वचनेऽपीदमेव तत्त्वं गृहीतमस्ति। जपस्य सर्वेषु यज्ञेषु श्रेष्ठत्वात् भगवता—

"यज्ञानां जपयज्ञोऽस्मि"

इति बोधितम्। नामजपे दशनामापराधाः समाम्नाताः। तेषां स्वरूपं प्रायः प्रसिद्धं विद्यते, एतेषां परिपालनेन विना भगवत्साक्षा-त्कारस्य सिद्धिर्नभवितुमर्हति। अतस्तासां रीतीनां ज्ञानं सम्प्राप्य साधकैर्भजनात्सिद्धिः प्राप्तुं समुचिता भवति।

३. जपद्वारा मन्त्रे चैतन्यामायाति कुण्डलिनीशक्तिश्च जागृता भवति। तदनन्तरं मन्त्रः देवतास्वरूपं धारयति। स्वप्ने देवतायाः दर्शनमावेशः साक्षात्कारश्च भवति, एवमेतदवस्थात्रितये सम्पन्ने सति अर्थात् तिसृष्वेतास्ववस्थासु देवतायाः स्वरूपे पूर्णतया प्रत्यक्षे जाते कुण्डलिन्याः पूर्णा जागृतिर्भवति। अस्यामेवावस्थायां सिद्धि-कामिभ्यः सिद्धिः निष्कामसाधकेभ्यश्च मुक्तेरधिकारः सम्प्राप्यते।

भिन्नभिन्नमन्त्राणां सिद्धिकाले अनेकासां दिव्यमूर्तीनां प्रत्यक्षं साधकः प्राप्नोति। कुण्डलिन्यैवैषां प्रकाशमयरूपाणां सृष्टिर्भवति।

"स्वाध्यायादिष्टदेवता सम्प्रयोगः"

सूत्रेणानेनेदमेव तत्त्वं श्रीव्यासदेवेनैतद्भाष्ये बोधितम्। जपकाले महामहान्ति विचित्राणि स्वप्नदर्शनानि भवन्ति, तेषां विचारः मन्त्रयोगसंहिता-मन्त्रमहोदधिप्रभृति ग्रन्थेषु कृतः। अनेनसाधकाय यः समाधिलाभो भवति स भावसमाधिः कथ्यते। मन्त्रयोगस्याश्रयः सर्वेष्वपि योगेषु भवति, यतो हि परमात्मसाक्षात्कारे मन्त्र एव प्रधानं कारणमस्ति।

४. मन्त्राणां शब्दात्मकत्वात्तथा शब्दस्य समस्तव्यवहाराणां कारणत्वात् आर्यशास्त्रेषु तद्विषये भूयान् विचारः कृतो विद्यते। शब्दस्य परमकारणीभूतेन ब्रह्मणा सह अभेदः सम्बन्धोऽस्ति। बाइबिल ग्रन्थेऽपि कथितं यत्—

"In the beginning was the word, and word was with god and the word was god" अर्थात् सृष्टेरारम्भकाले केवलः शब्द आसीत्। स परमात्मना सहैवासीत्, स च स्वयं परमात्मस्वरूपभूत आसीत्। पराशक्तिर्यदा-सिसृक्षया 'अहम्' रूपेण ब्रह्मणः प्रकाशात्मकभावम् तथा विषयस्य "इदम्" रूपेण विमर्शात्मकं रूपं धारयित्वा विषयविषयिणोः रूपं व्यञ्जयति तदा तद् हेतुः शब्द एवोच्यते। महर्षिणा व्यासेन वेदान्तदर्शनस्य—

"शब्द इति चेन्नातः प्रभवात् प्रत्यक्षानुमानाभ्याम्"

[१।३।२८]

इति सूत्रे सृष्टेः हेतुः शब्द एव कथितः। श्रुतिस्मृतिप्रमाणेन शब्द एव जगत्कारणमस्तीति भाष्यकारेणानेकैः प्रमाणैः साधितम्।

साऽत्यन्तं सूक्ष्मावस्था विद्यते। अयमादिमः शब्दः परा वाणीति कथ्यते। इयं ब्रह्मणो भाषा कथ्यते। मूलाधारेणस्याभिव्यक्तिर्भवति। इमां योगिन एव ज्ञातुं शक्नुवन्ति। मन्त्राणां बीजानां विकासोऽनयैव भवति। यदा विमर्शस्य प्रकाशस्य च स्थूलावस्था जायते तदा सैवोच्यते 'नाद' इति। नादे समस्ता वर्णाः अर्थप्रकाशनरूपेण सामर्थ्येन युक्तास्तिष्ठन्ति। यथा यथा सृष्टिः स्थूलं रूपं धारयति तथा तथा शब्दोऽपि स्पष्टं रूपं धारयति। क्रमशः पश्यन्तीमध्यमावैखरीति वाणीरूपत्रयं दधन् शब्द एव वैदिकलौकिक व्यवहाराणां कारणं भवति। परा वाणी सत्या नित्या च समाम्नाता।शेषासु वाणीषु मायाया अज्ञानस्या वा परिणामानांसम्बन्ध सद्भावेन क्रमशस्तारतम्यं जातम्। सत्यप्रकाशन्यूनताकारणादेव तत्र न्यूनतां कल्पयित्वाऽतिरिक्तास्त्रयो भेदाः कृताः। व्याकरणशास्त्रे वर्णाद्भिन्नः स्फोटः शब्दरूपेण स्वीकृतः। नादः वर्णस्य संज्ञाऽस्ति—"नादाऽभिव्यंग्यः शब्दः स्फोटः"। नादेन वर्णेन वा स्फोटस्य व्यक्तिः प्रकाशो वा भवति स चास्ति नित्यः। उपवर्षाचार्यस्य मते वर्ण एवास्ति शब्दः। महर्षिः पतञ्जलिः, भर्तृहरिः, कैयटादयश्च प्रसिद्धा वैयाकरणाः स्फोटवादं स्वीकुर्वन्ति। नागेशभट्टेन स्फोटमतस्यैव परमलघुमञ्जूषायां प्रतिपादनं कृतम्। शब्दतत्त्वस्य व्यञ्जनाय त्रिषष्टि (६) श्चतुषष्टिर्वा वर्णाः स्वीक्रियन्ते।

त्रिषष्टिश्चतुषष्टिर्वा वर्णाः शम्भुमते मताः।
प्राकृते संस्कृते चापि स्वयं प्रोक्ताः स्वयंभुवा।
आत्मा बुद्ध्या समेत्यार्थान्मनो युङ्क्ते विवक्षया,
मनः कायाग्निमाहन्ति स प्रेरयति मारुतम्।
मारुतस्तूरसि चरन् मन्द्रं जनयति स्वरम्।

[पाणिनीय शिक्षा ३।६।७]

प्राकृते संस्कृते च त्रिषष्टि (६३) श्चतुषष्टि (६४) र्वा वर्णाः स्वयं स्वयंभुवा भगवता कथिताः। आत्मा बुद्धिद्वाराऽर्थान्संगृह्य

मनसा सह विवक्षया संयुनक्ति, मनः शारीराग्नावाघातं करोति, स आधाते वायुं प्रेरयति, तेन वक्षःस्थले गम्भीरस्वरोत्पत्तिपुरस्सरं [पश्यन्तीमध्यमातोऽग्रे] वैखरी नामिकाऽत्यन्तं स्थूला वाणी प्रकटा भवति।

शब्दः खे पौरुषं नृषु, शब्द ब्रह्मातिवर्तते, ओमित्येकाक्षरं ब्रह्म,

इत्यादि गीतावचनेष्वपि शब्दतत्त्वस्य विवेचना कृताऽस्ति। उदात्तानुदात्तस्वरितभेदैः षड्जर्षभगान्धारमध्यमपञ्चमधैवतनिषादाख्याः सप्तस्वरा अपि शब्दस्योच्चारणे मन्यन्ते। योगशास्त्रे नादविन्दुकलेति त्रीणि नामानि शब्दस्यैव अवस्थाभेदेषु दत्तानि। यथा यथाऽर्थेषु वैचित्र्यं भवति तथा तथा शब्दोऽपि रूपं धारयति। शुद्धस्य सात्त्विकस्य दैवभावस्य व्यञ्जकः शब्द एव मन्त्र उच्यते। दैवभावस्य व्यञ्जकाश्चत्वारः सम्प्रदायाः मन्त्रैरेव निर्मिताः, ये हि वैदिक-पौराणिक-तान्त्रिक-शाबर संज्ञा लभन्ते। उत्तरोत्तरापेक्षया पूर्वपूर्वस्य श्रेष्ठत्वमस्ति। अर्थात् शाबरेण तान्त्रिकस्य, तान्त्रिकेण पौराणिकस्य, पौराणिकेन वैदिकमन्त्रस्य श्रेष्ठता स्वीक्रियते। तान्त्रिके सम्प्रदाये एकपञ्चाशत् संख्या (५१) वर्णानां स्वीकृता, शेषाः द्वादशस्त्रयोदश वा वर्णाः वेद एवोच्चारणभेदेन स्वीकृताः। वस्तुतस्तु एकपञ्चाशन्मातृकास्वेव वाङ्मयस्य समावेशः यथार्थरूपेण सञ्जायते। तन्त्रेषु विशिष्ट भावानां प्रकाशनाय बीजमन्त्रा अपि स्वीकृताः। भगवत अष्टानां मुख्यप्रकृतीनां सद्दशतयाबीजमन्त्रा अपि ॐकारस्वरूपस्य शब्दब्रह्मणोऽष्टप्रकृतिरूपेण प्रधानाः स्वीकृताः, ये हि मन्त्रयोगसंहितायामित्थं कथिताः—

"गुरुबीजं शक्तिबीजं रमाबीजं ततो भवेत्।
कामबीजं योगबीजं तेजोबीजमथापरम्।
शक्तिबीजं च रक्षा च प्रोक्ता चैषां प्रधानता॥"

(ऐं, ह्रीं, श्रीं, क्लीं, क्रीं, ट्रीं, स्त्रीं, ह्लीं) एतान्यष्टापि बीजानि

ओङ्काररूपस्य शब्दब्रह्मणः प्रधानशक्तिरूपेण स्वीकृतानि सन्ति। प्लुतस्वरावशिष्ट ओंकार एव लिङ्गपुराणे नादः कथितः। मन्त्रशास्त्रे मन्त्रास्त्रिप्रकाराः कथिताः, बीजमन्त्रः, मन्त्रः मालामन्त्रश्च। एतेषु मन्त्राणां मालामन्त्राणां चार्थस्तु प्रकाशितो भवति, बीजमन्त्रास्तु जपेनैव स्वकीयमर्थं प्रकाशयन्ति। व्युत्पत्यपेक्षयैतेषामर्थज्ञानं न भवति। यथा क्रीं, ह्रीं, हुं, फट् एषां मन्त्रशास्त्रप्रणालीद्वारा साधकैर्विभिन्नाः सिद्धयः प्राप्यन्ते। मन्त्रसिद्धिः ह्रस्वदीर्घप्लुतस्वराणामुच्चारणप्रकारस्य ज्ञानेन पूरकमन्त्रस्य साहाय्येन सञ्जायते। तेनैव कुण्डलिन्या उत्थानं जायते सुप्ताश्च नानादैवीशक्तयो जागृता भवन्ति, तदैव जीवः अविद्यया मुक्तः सन्ब्रह्मानन्दस्य भोक्ता भवति।

५. शब्दस्यार्थस्य च वैयाकरणानां मते भेदाभेदः स्वीक्रियते, परन्तु मीमांसाशास्त्रे तन्त्रे च तयोरभेदो मन्यते—अर्थात् देवता मन्त्रश्च एक एवास्ति। देवताया पूर्वरूपमेव शब्दः मन्त्रो वाऽस्ति। अत एव तान्त्रिकसाधकं प्रति तन्त्रे विषयेऽस्मिन् उच्यते—

यथा घटश्च कलशः कुम्भश्चैकार्थवाचकः।
तथा देवश्च मन्त्रश्च गुरुश्चैकार्थ उच्यते॥
यथा देवस्तथा मन्त्रो यथा मन्त्रस्तथा गुरुः।
देवमन्त्रगुरुणां च पूजया सदृशं फलम्॥

(कुलार्णवतन्त्र १३ उ. ६४, ६५)

यथा घटः, कलशः, कुम्भश्चैकमेवार्थं बोधयन्ति, तथैव देवतायाः मन्त्रस्य गुरोश्च अभेदोऽस्ति। यथा देवताः सन्ति तथैव गुरवः सन्ति मन्त्रा अपि तथैव सन्ति। एतेषां पूजनेन तुल्यं फलं भवति। एतेन देवतया सह अभेदः नित्यता च विज्ञाता भवति। वेदोऽपि शब्दस्य नित्यतां बोधयति—

यज्ञेन वाचः पदवीयमायन्तामन्वविन्दन्नृषिषु प्रविष्टाम्।

(ऋ० सं० १०।७१।३१)

अर्थात् युगान्तेऽन्तर्हितान् वेदान् यज्ञद्वारा सृष्टेरारम्भे पुनः ऋषयः समवाप्नुवन्।

अत एव च नित्यत्वम् (वे० १।३।२९)

वेदान्तदर्शनस्यैतस्मिन् सूत्रेऽपि शब्दरूपस्य वेदस्य नित्यता बोधिता या हि ब्रह्मणा सहाभेदे सत्येव घटितुमर्हति।

६. सात्त्विकभावातिरिक्तं राजसतामसभावबोधका अपि वेदे पुराणे तन्त्रे च सन्ति मन्त्राः, तथापि तेऽधिकारिभेदेनैव कथिताः सन्ति। तेषामन्तिमं लक्ष्यं तेषामर्थानां प्रतिपादने नास्ति। श्येनयागवर्णनम्, राज्ञोवेनस्य कथा, त्रिशीर्षत्वष्टृकथा, मारणमोहनोच्चाटनविद्वेषणादितान्त्रिकप्रयोगाणामुपयोगः कस्मिन्नपि कालविशेषे लोकहितापेक्षया वा प्रतिपादिताः सन्ति। आपेक्षिकरूपेणैवैते ग्राह्या न वास्तवधिया, कर्मणामेषामाचरणानन्तरं प्रायश्चित्तविधानाच्च निषेधकोटावेव इमे बोध्याः। सात्त्विकेषू कर्मसु तु "प्रत्यवायो न विद्यते" इति कथितम्।

७. मन्त्रे छन्दः, ऋषिः, देवता, बीजम्, कीलकम्, शक्तिरिति मुख्यतया षट्तत्त्वानि कथ्यन्ते। वैदिकेषु मन्त्रेषु छन्दः ऋषिः, देवतेति त्रयाणामेव तत्त्वानामुपयोगो भवति। अवशिष्टैः सह षडङ्गानामुपयोगस्तान्त्रिकेषु मन्त्रेषु भवति शाबरमन्त्राणां विषये—**अनमिल आखर मंत्र न जापू,** तथा—**शाबर मंत्रजाल जिनसिरजा,**

आदिभिः पद्यैः स्मरणं क्रियते। पौराणिका मन्त्रा भावप्रधाना भवन्ति। "ॐ नमो भगवते वासुदेवाय" एवमादायः। एतेषु मन्त्रेषु क्रियाया गौणता भवति। मनसेष्टरूपस्य भावनासातत्येनैव सिद्धिर्जायते। क्रियाया मुख्यता तान्त्रिकेष्वेव मन्त्रेष्वभीष्टा भवति, वैदिकेषु मन्त्रेषूभयमपि भवत्यभीष्टम्। मन्त्रोच्चारणरीतिश्छन्दसः, मन्त्रतत्त्वस्याविष्कर्त्तुः परिचयो ऋषितः, समस्तेष्टफलप्रदातुर्देव-

तायाः परिज्ञानं मन्त्रात् ध्यानरीतेश्च करणीयं भवति। मन्त्रस्य मूलतत्त्वं संक्षिप्तरूपेण बीजे भवति। विरोधिशक्तिर्या तत्त्वस्य विनाशं करोति साधकं साधनातो विदूरयति, तस्या विरोधाय कीलकस्योपयोगो भवति।

मन्त्रे चैतन्यस्य संचारः शक्त्या जायते। मन्त्रयोगिना रहस्यानीमानि विज्ञाय मन्त्रसाधनायां प्रवृत्तेन भाव्यम्। एतदतिरिक्तं विशिष्टभावानां व्यक्तये—अन्तर्मातृकान्यासः, बहिर्मातृकान्यासः षोढान्यासः, प्रपञ्चन्यासः, भुवनन्यासः, देवन्यासः, शक्तिन्यासः, श्रीकण्ठन्यासादयः कथिताः। अन्तर्योगबहिर्योगद्वारा देवतायाः पूजन-तर्पण-होम-पुरश्चरण-संस्कारादिभिर्मन्त्रः शीघ्रमेव सिद्धो भवति। एतैरुपायैर्मन्त्रचैतन्ये जाते देवतायाः साक्षात्कारो भवति। मन्त्रचैतन्याभावे देवतायाः स्वरूपं न ज्ञायते, तदैव देवताया व्यक्तं रूपं साधकस्य सम्मुखे भवति। परब्रह्मपरमात्मैव देवताया रूपे स्वज्ञानशक्तिद्वारा व्यक्तो भवति। अनेकासां देवतानां यानि भिन्न-भिन्नरूपाण्यार्यधर्मे संमतानि तेषामेतद्रूपवैचित्र्यं मन्त्रैरेव ज्ञायते, मन्त्रैरेव च तेषामनेकत्वं व्यक्तं भवति, तथापि तेषु प्रकटं चेतनतत्त्वमेकमेवास्ति।

"एकं सद् विप्रा बहुधा वदंति।"

इत्यस्मिन्मन्त्रे इदमेव तत्त्वं प्रकाशितमस्ति।

८. शब्दतत्त्वमथवा यां शब्दशक्तिरितिवदन्ति तस्या ज्ञानेन ज्ञानशक्त्या वा साहचर्यं विद्यते। शब्दशक्तिं विना ज्ञानं न संभवति, अर्थात् ज्ञानस्य व्यञ्जकोऽस्ति शब्दः। यथा शब्दस्यार्थेन सम्बन्धोऽस्ति, तथैव ज्ञानेनापि तस्य सम्बन्धो विद्यते। आनन्दशक्तिः क्रियाशक्तिश्चापि ज्ञानशक्तिद्वारैव स्वस्वरूपं प्रकटयति। यावन्त्यपि भौतिक-दैविकाध्यात्मिकरहस्यानि सन्ति तानि सर्वाणि

ज्ञानात्मकान्येव विद्यन्ते। तेषां प्रकाशनं शब्दात्मकैर्ग्रन्थैः, मन्त्रैः आख्यानेतिहासैश्च ऋषय आचार्याः साधवो महात्मानश्च कृतवन्तः। उपासका अस्यैव तत्त्वस्य ध्यानं सरस्वतीशक्तिरूपे कुर्वन्ति। सरस्वत्या ध्याने वीणापुस्तकद्वारा शब्दशक्तेः, नीरक्षीरविवेकर्त्रा हंसवाहनेन विवेकशक्तेर्ज्ञानशक्तेर्वा साहचर्यं प्रतीयते। एतेन ध्यानस्य रहस्यमयकल्पनायाः सम्यग् भावाभिव्यक्तिर्जायते।

९. मन्त्रस्य सम्यगभ्यासे जाते शुद्धं सात्त्विकस्वरूपयुक्तं तत्त्वं साधकस्य सम्मुखे प्रकटितं भवति, तस्मै चैव राम, कृष्ण-शिव-शक्ति-नारायणादि नामानि दीयन्ते। एतेषां स्वरूपाणां तत्त्विकः स्वरूपपरिचयः, एतेषां च स्वरूपाणां साक्षात्कर्तुः साधकस्य गुणानां स्वभावस्य च ज्ञानम्, यत् कस्य साधकस्याधिकारः कस्य भावस्य साक्षात्कारसम्पादनयोग्योऽस्ति, कस्य भावस्य देवेन सहास्यैक्यं विद्यते, कां भावोऽस्य साधकस्योपर्यनुग्रहं कर्तुं समर्थ इत्यादीनां तत्त्वानां निर्णयं गुरुं विना कोऽपि ज्ञातुं समर्थो न भवति। अतएव परब्रह्मणो यत् स्थानमस्ति साधनामार्गे तदेव स्थानं गुरोर्विद्यते। श्रुतावुक्तम्—

"यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ।"

अर्थात् यस्य साधकस्य देवे गुरौ च समानबुद्धया भक्तिर्भवति तस्मै उपनिषदर्थाः प्रकाशन्ते। ये मनुष्याः स्वमनसैव साधनां कुर्वन्ति, ते वास्तवरूपेण श्रमातिरिक्तं किमपि न लभन्ते। अतएव साधकः दीक्षातत्त्वोपदेशं सम्प्राप्य साधनायाः प्रारम्भं कुर्यात्। यद्यपि शास्त्रेष्वेते विषयाः पर्याप्तरूपेण कथिताः सन्ति, तथाप्यभ्यासकाले समागतानां विषयाणां निर्णयं तु गुरुरेव कर्तुं शक्नोति। अतएव परमया श्रद्धया विश्वासेन च गुरुसेवासम्पादनं साधकस्य मुख्यं कर्तव्यमस्ति। अत्र यदि काचिदपि त्रुटिर्भविष्यति तदा साधना निष्फला भविष्यति।

अथ हठयोगाऽभ्यास निरूपणम्

१०. योगाभ्यासस्य साधनानां रहस्यं मनसो विक्षेपकारकाणां वृत्तीनां निरोधं कृत्वा ब्रह्मानन्दस्याविच्छिन्नप्रवाहपरिचालन एव पर्यवसितं भवति। हठयोगे मन्त्रयोगे च कुण्डलिनीशक्तेरुत्थानमेव पूर्वोक्तकार्यस्य साधकमस्ति। कुण्डलिन्या उत्थानमेकमत्यन्तकठिनं कार्यमस्ति। कार्येऽस्मिन् प्राणायामस्य साधनं मुख्यमस्ति। केचित् कुण्डलिनीशक्तिं वायुं नाडीविशेषं वा मन्यन्ते, तथापि विषयेऽस्मिन् स्वानुभव ईदृशोऽस्ति यत्—यथा रेडियमयुक्तघटीयन्त्रेषु अन्धकारः प्रकाशश्च सहैव तिष्ठतः, तथैव विद्युतः सूक्ष्मतारसदृशे मूलाधार-चक्रे उपरिभागे चक्राकारत्रिचतुरावर्तनेषु किञ्चित् पीताभः प्रकाशोऽन्धकारेण सह मिलितो दृश्यते। स अन्धकारः हठयोग प्रक्रियाभिर्दूरीक्रियते, अन्धकारस्यापगमे सति स्वत एव स गोलाकारः प्रकाश ऋजभूयोर्ध्वगमनं करोति। यथा हि गोलाकारो लौहतारः ऋजुक्रियते तथैवात्रापि ज्ञातव्यम्। कुण्डलिन्या ऊर्ध्वगतिर्यथार्थं सर्परूपेण भवति। भिन्नभिन्नेषु चक्रेषु यदस्या गमनं तदेवानेकासां सिद्धीनां जनकं भवति। सहस्रारे गत्वा चिन्तनद्वारा पुनस्तस्या मूलाधारे स्थापनं क्रियते, तत्र कोऽपि विशेषः श्रमो न भवति। सर्वेषां चक्राणामनुभवानन्तरमियं स्वयमेव स्वस्थाने पूर्वरूपे गच्छति एकवारमभ्यासे जाते पुनः काठिन्यानुभवो न भवति। मूलाधार-स्वधिष्ठान-मणिपूरचक्रं यावत्तु तस्या गतेः स्पष्टं दर्शनं न जायते, मणिपूरादूर्ध्वं प्रत्यक्षरूपेण साधकस्तां पश्यति। यस्मिन् समये कुण्डलिन्या जागृतिर्भवति तस्मिन् समये मेरुदण्डमार्गे गभीरः प्रकाशः व्याप्तो भवति यश्चापूर्वानन्दस्य जनको भवति। एतावन्मात्रमुत्थान-क्रियाया रहस्यमस्ति। भस्त्राकुम्भकम्, भुजङ्गासनम्, विपरीत-करणमुद्रा, महामुद्रा, मयूरासनम्, पश्चिमोत्तानासनम्, मूलबन्धः, उड्डीयानबन्धः, जालन्धरबन्धः, सूर्यवेधप्राणायामश्च कार्येस्मिन्

सहायकाः पूर्णोपयोगिनश्च साधनभूताः सन्ति। एतेषां हठयोग-साधनानामभ्यासकाले कुण्डलिनीस्तोत्रस्य, कुण्डलिनीकवचस्य, महा विद्यास्तोत्रकवचयोः पाठः ग्रन्थसाहबस्थ सुखमनीसाहबस्य पाठो विचारश्चापि कार्येऽस्मिन् सहायतां करोति। मन्त्रशास्त्रे मन्त्रस्य सिद्धिः, देवतायाः साक्षात्कारः मन्त्रचैतन्यं चापि कुण्डलिन्यैव स्वीक्रियन्ते। तन्त्रे अस्या सर्वस्य जगतः अभिन्ननिमित्तोपादानकारणता बोधिताऽस्ति। अस्या उत्थाने जाते शरीरस्थानां विभिन्नचक्राणां ज्ञानं योगिने विनाऽयासमेव जायते।

(१) मूलाधारः, (२) स्वाधिष्ठानम्, (३) मणिपूरः, (४) अनाहतः, (५) विशुद्धः, (६) आज्ञाचक्रश्चेत एव षट्चक्रा उच्यन्ते, एतदुपरि विद्यते सहस्रारः। कुण्डलिन्या जागृतिर्भक्तियोगेन भगवन्नामजपेन ज्ञानयोगादिभिश्चापि भवति तथाप्येता हठयोगक्रिया एव पूर्णसफलतां प्रयच्छन्ति। अन्यानि साधनान्येतस्मिन् विषये स्थायिनं कार्यं न कुर्वन्ति, हठयोगस्याग्रे तानि दुर्बलानि सन्ति। अस्योग्रतां दृष्ट्वा दुर्बलचित्ता मानवाः भयभीताः सन्तः तस्य निन्दामपि कुर्वन्ति, तथापि योग्यस्य गुरोः समीपे स्थित्वा साधनमिदं सुखपूर्वकमनुष्ठातुं शक्यते। अस्य साधनेन शारीरिकाः, दैविका आध्यात्मिकाश्च त्रयोऽपि लाभा भवन्ति, वास्तवेनायं साधनराजोऽस्ति। नेतिधौतकर्मादिभिः षट्कर्मभिः शरीरशुद्धिं विधाय सिद्धासनेन वज्रासनेन वा समुपविश्य प्रारम्भे विंशतेरारभ्याशीतिपर्यन्तं प्राणायामस्य मासत्रयं यावदभ्यासः करणीयः, क्रमेण च वर्धयित्वा ३२० पर्यन्तं करणेन योग सिद्धो भवति। एवमभ्यासेन ऐश्वर्यकामिनः कृते ऐश्वर्यस्य मुमुक्षुपुरुषाणां कृते च परमपदप्राप्तेर्द्वारमनावृतं जायते।

११. पंचभूतानां विकारैरिदं शरीरं निर्मीयते। रसो रक्तं मांसमेदोऽस्थिमज्जावीर्या सप्तधातवः कथ्यन्ते। वातपित्तकफानां सम-

भावेनेदं शरीरं स्वस्थं तिष्ठति। प्राणापानसमानोदानव्यानाः पञ्च-प्राणा अत्र तिष्ठन्ति। नागदेवदत्तकृकलकूर्मधनञ्जयाख्याः पञ्चोप-प्राणा अत्र कथ्यन्ते। चक्षुर्नासिकाश्रोत्रत्वग्रसनाख्यानि पञ्चकर्मेन्द्रि-याणि वाग्हस्तपादपायूपस्थाख्यानि पञ्चकर्मेन्द्रियाण्युच्यन्ते। एतेषां सर्वेषां संचालनं समनस्केनात्मना संजायते। स्वीयाङ्गुलप्रमाणेन ९६ अङ्गुलप्रमाणमिदं शरीरं भवति इडापिङ्गला सुषुम्नेति नाडी-त्रययुक्तं त्रिरावृतं ब्रह्मसूत्रं सर्वे प्राणिनः स्वशरीरे धारयन्ति। योग-शास्त्रे ७२००० नाडीनामवस्थानं शरीरे मन्यते। तासु १४ मुख्याः सन्ति, तास्वपि तिस्रः, अन्ते च सुषुम्नैव नाडी प्रधानास्ति, तस्या-मेव योगः प्रतिष्ठितो भवति। इड़ा, पिंगलासुषुम्नाभिस्त्रिरावृत्त-मिदं यज्ञोपवीतमस्ति यत् त्रैवर्णिका धारयन्ति। एतस्य लक्ष्यं सहस्रारस्य द्योतिका शिखा भवति। यावदन्तर्भावस्य लक्ष्यं नास्ति तावत् यज्ञोपवीतं शिक्षा च धार्यते, येषामन्तर्ज्ञानं जायते, ते तदेत-त्परित्यजन्ति। अतएव सन्यासप्रकरणे कथितम्—

"सोपवीतां शिखां त्यजेत्।"

सुषुम्नान्तर्भूता चित्रा, वज्रा ब्रह्मनाडी च मन्यते। ब्रह्मनाड्यामेव षट्चक्राणां सम्बन्धोऽस्ति, यतीनामयमेवास्ति त्रिदण्डः। एतासु तिसृषु ब्रह्मनाड्यां ब्रह्मतत्त्वस्य प्रकाशसद्भावादस्या मुख्यताऽस्ति। अतएव परमहंसा यतय एकमेव दण्डं धारयन्ति। इडाया देवश्चन्द्रः, पिंगलायाः सूर्यः, सुषम्नायाश्चाग्निर्विद्यते। अग्नेःरक्तवर्णत्वात् गैरिकवर्णरञ्जितानि वस्त्राणि यतयो धारयन्ति। मेरोरन्तर्गतः षोडषाधार एव दण्डस्य षोडषपर्वाणि तथा आधारचक्रमेव कमण्डलु-रस्ति। वास्तवे तादृशयोगचिह्नानां धारयितैव यतिरस्ति। एता-दृशो ब्रह्मदण्डः येन सम्प्राप्तः स पुनर्वंश दण्डं धारयेन्मा वा धारयेत् यतः स यतिः कृतकृत्यो भवति।

१२. मूलाधारादारभ्य सहस्रारपर्यन्तं मेरुदण्डः शरीरस्यास्य

समस्तभागानामाधारभूतदण्डाकारः स्थितः। (१) सर्वाधस्तादा
धारपद्मस्य चिन्तनं योगी करोति यत् हि गुदेन्द्रियात्किञ्चिदूर्ध्वे
विद्यते। तस्मिन् कमले चत्वारि दलानि सन्ति, यत्र प्रत्येकस्मिन्
पत्रे व, श, ष, स—इमे एकैकं वर्णाः सन्ति। ब्रह्मा डाकिनी चास्य
देवते स्तः। पृथिवीतत्त्वस्य चतुष्कोणाकार'लं'बीजयुक्तस्य मण्ड
लस्यात्रैव चिन्तनं भवति। स्वयंभूलिङ्गेन वेष्टितः कुण्डलिन्या
शक्तेर्वासो विद्यते। एतस्याश्चिन्तनेन योगीतत्त्वज्ञो भवति, सर्वास
सिद्धोनां च पात्रं भवति। (२) लिङ्गेन्द्रियस्य मूले आधारपद्मा
दूर्ध्वं स्वाधिष्ठानपद्मं वर्त्तते, अस्य रक्तवर्णो विद्यते। ब, भ, म
य, र, ल—एतैः षड्भिर्वर्णैर्भूषितानि षड्दलानि तत्र सन्ति। जल
तत्त्वस्य 'वं' बीजं विष्णुः राकिनी चास्य देवते स्तः। (३) मणि
पूराख्यं तृतीयं पद्मम्, नभिरेतस्य स्थानं भवति। अत्र दशदलानि
सन्ति, नीलोऽस्य विद्यते वर्णः। ड, ढ, ण, त, थ, द, ध, न, प, फ
एतैर्वर्णैरिदं विभूषितमस्ति। रुद्रो लाकिनी चास्य देवते स्तः
अग्नेस्त्रिकोणाकारस्य 'रं' बीजयुक्तमण्डलस्यात्र चिन्तनं भवति
(४) अनाहतनामकं वक्षःस्थले ईषद्रक्तवर्णं पद्मं विद्यते
द्वादशदलानि क, ख, ग, घ, ङ, च, छ, ज, झ, ञ, ट, ठ एभि
र्वर्णैर्भूषितानि सन्ति। तदिदं षट्कोणेन हरितवर्णेन 'यं' बीजे
युक्तम्, वायुतत्त्वस्य चिन्तनमत्रैव भवति। ईशानः काकिनी चास्
देवते स्तः। अत्रैव बाणलिङ्गस्य स्थितिरस्ति। एतस्य किंचिदूर्ध्वमष्ट
दलकमले स्वेष्टदेवस्य ध्यानं क्रियते। (५) कण्ठे स्थितं विशुद्ध
चक्रं धूमवर्णयुतं—अ, आ, इ, ई, उ, ऊ, ऋ, ॠ, ऌ, ॡ, ए
ऐ, ओ, औ, अं, अः—एभि षोडशस्वरैश्च युतं भवति। तथ
'हं' बीजयुक्तस्याकाशतत्त्वस्यात्र चिन्तनं क्रियते। सदाशिव
हाकिनी चास्य देवते स्तः। कलङ्करहितस्य पूर्णचन्द्रस्य चिन्त
तथा जीवस्य वासोऽत्रैव विद्यते। (६) भ्रूमध्ये द्विदलं पद्मम्, य
'ह' 'क्ष' इत्येतद्वर्णद्वयभूषितमस्ति। शाकिनी अर्धनारीनटेश्वरश्चा

देवते स्तः। इतरनामकं लिङ्गमत्रैव विद्यते। मनसो वासोऽत्रैव मन्यते। ॐ कारबीजस्य चिन्तनमत्रैव भवति। (७) सहस्रार-पद्मस्य स्थितिर्ब्रह्माण्डे विद्यते। अत्र सहस्रदलानि सन्ति। सम्पूर्णा वर्णाः २० वारमावृत्यात्र स्थिताः। 'ह', 'ल', 'क्ष' एते त्रयो वर्णाः मध्ये सन्ति। एतस्य मध्ये द्वादशकमले त्रिकोणाकारं गुरो सिंहासनमस्ति। परमशिवस्य परायाः शक्तेश्च चिन्तनं गुरुरूपे क्रियते। संक्षेपतः षट्चक्रनिरूपणस्येदं तत्त्वमस्ति। कुण्डलिनीशक्तेर्जागरणे-नैतेषामारोपे लये च योगी चिन्तनसमर्थो भवति।

१३. एतासां तिसृणां नाडीनां वर्णनं वेदेऽपि यज्ञरूपेण कृतमस्ति—

सुषुम्णः सूर्यरश्मिश्चंद्रमागंधर्व—स्तस्य नक्षत्राणि अप्सरसोभेकुरयो नाम स न इदं ब्रह्मक्षत्रं पातु तस्मै स्वाहा वाट् ताभ्यः स्वाहा।

[यजुः १८-४०]

सुषुम्ना अग्निर्यस्मिन् यज्ञे दीप्यते तेनैव सूर्यश्चन्द्रः नक्षत्राणि च प्रकाशितानि भूत्वा संसारस्य रक्षां कुर्वन्ति। आध्यात्मिके रूपे इयमेवाग्नितत्त्वयुता सुषुम्ना कथ्यते।

राजयोगः

१४. अन्तःकरणवृत्तयः सात्त्विकराजसतामसेति भागत्रये विभक्तुं शक्यन्ते, येषु राजसतामसेति द्विविधवृत्तीनां सर्वथा निरोधं कृत्वा सात्त्विकवृत्तीनां प्रवाहो यः सुखात्मकः ज्ञानात्मकश्च भवति तस्या-नवच्छिन्नरूपेण परिचालनमेव वास्तवरूपेण सम्प्रज्ञातयोगो भवति। एतयोर्द्विविधवृत्त्योर्निरोधो विचारेणैव सम्पाद्यो भवति। अतएवा-सनप्राणायामादीनामस्मिन् योगेऽपेक्षा न जायते। एतेन महान्तं पराक्रमं योगी प्राप्नोति, यतोहि—

"यथा क्रतुः पुरुषो भवति।"

अर्थात् यादृशो भावना पुरुषस्य भवति तथैव स सञ्जायते। अभ्यासेनानेन कीदृशोऽपि विकारो यदा मनसि न तिष्ठेत् तदा ज्ञातव्यं यद् योगः सिद्धो जातः। मनसः पवित्रताया विषये योगिभिर्बोधितं यत्—पूर्णं युवानं सुन्दरीं नवयौवनां हावभावयुतां युवतीञ्चैकान्ते रहस्यपूर्णां वार्तां कुर्वन्तौ विलोक्यापि मनसि यदि कीदृशोऽपि क्षोभो दुर्भावना वा न समुत्पन्ना भवेत् तदा ज्ञातव्यं यदस्मदीयो योगः सिद्धो जातः। याथार्थ्येनायमेव योगः सर्वश्रेष्ठो विद्यते। अयमेव राजयोगः कथ्यते। सर्वप्रकाराणां वृत्तीनां निरोधोऽसम्प्रज्ञात योग उच्यते। धारणाध्यानसमाधिभिस्त्रिभिः साधनैर्योगः सिद्धो भवति येष्वसम्प्रज्ञातः समाधिर्योगस्यान्तरङ्गं साधनमस्ति, सम्प्रज्ञातश्चबहिरङ्गं साधनम्भवति। एतेनैव सिद्धयः प्राप्यन्ते, विषयोऽयं योगदर्शनस्य विभूतिपादे विस्तरेणोक्तः। समस्तानां वृत्तीनां निरोधानन्तरं समाधिसुखस्यानुभवायैका वृत्तिर्भवति, तयैव समाधौ ब्रह्मानन्दस्यानुभवं योगी प्राप्नोति।

१५. वृत्तिः क्लिष्टाक्लिष्टभेदेन द्विविधा भवति। क्लेशयुक्ता क्लिष्टा तद्भिन्ना चाक्लिष्टा कथ्यते। अविद्याऽस्मितारागद्वेषाऽभिनिवेशाः पंच क्लेशाः कथ्यन्ते। (१) विपरीतं ज्ञानमेव भवत्यविद्या, इयमस्ति समस्तक्लेशानां जननी, अत एवेयं क्लेशानां क्षेत्रभूता कथ्यते। (२) प्रकृतिपुरुषयोर्विभागमविज्ञाय द्वयोरभिन्नताबोधेनास्मितानामकस्य क्लेशस्योत्पत्तिर्जायते। (३) अनुकूलेषु विषयेषु प्रीतिरेव रागः कथ्यते। (४) प्रतिकूलेषु विषयेषु द्वेषो भवति। (५) मृत्योर्भयमभिनिवेशो भवति। निरोधमेकाग्रतां च या वृत्तयो विषयीकुर्वन्ति ता अक्लिष्टा उच्यन्ते। शुद्धज्ञानात्मकान्तःकरणपरिणामभूताः सात्त्विका वृत्तय एव निरोधमेकाग्रताञ्च द्रढीकुर्वन्ति। क्षिप्ता मूढाः विक्षिप्ता वृत्तयस्तामसराजसक्रमेणोत्पद्यन्ते। एतासु वृत्तिषु योगो न भवति। विक्षिप्तवृत्तीनां निरोधा-

वस्थायामानयनाय योगस्याष्टाङ्गसाधनानामुपदेशः प्रदत्तोऽस्ति। विषयप्रकाशकस्यान्तःकरणस्य ज्ञानात्मकः परिणामो वृत्तिरुच्यते। प्रकृतिःस्वाभाविकरीत्या स्वीयं कार्यं सम्पादयति, तस्यास्तादृशः स्वभावो निरोद्धुं न शक्यते—

"प्रकृतिं यांति भूतानि निग्रहः किं करिष्यति।"

तथापि जीवोऽज्ञानमूलकं रागद्वेषपूर्णं व्यवहारं करोति, स एव क्लेशहेतुरस्ति। अतो **"योगश्चित्तवृत्तिनिरोधः"** सूत्रेऽस्मिंस्तेषामेव निरोधः कथितः। अतएवाऽभ्यासस्योपदेशः सम्पाद्यते।

१६. स्वेष्टरूपस्य परमात्मनश्चिन्तनमभ्यास उच्यते अथवा ध्येय विरोधिनं ज्ञानं निरुध्य स्वाभीष्टविषये वृत्तेर्निरन्तरप्रवाहणमभ्यासो भवति। अभ्यासो द्विविधो भवति, एको लौकिकः, द्वितीयः पारमार्थिकः। लौकिकेनावधानेन संसारस्य कार्याणि सिध्यन्ति। योगे सिद्धीनां वर्णनमपि तादृशमेवाऽस्ति। तेनैश्वर्यमात्रस्य प्राप्तिर्भवति, तच्च क्षणिकमस्ति। एतेषु मुमुक्षुणा वैराग्यं धारणीयम्। वास्तविकं फलन्तु परमात्मन्येव वृत्तेः प्रवर्तनेन भवति। तदिदं नित्यस्य स्थायिनः फलस्य प्रदायकं भवति। अतस्तदर्थमेवाऽभ्यासः कर्तव्यः। आहारस्य संयमेन स्थूलान्नमयस्य शरीरस्य संयमः, प्राणायामेन प्राणस्य संयमाऽभ्यासः, ध्यानाऽभ्यासेन मनसो निरोधः विवेकपूर्वकेण विचारेण बुद्धेरेकाग्रताया अभ्यासानन्तरं शरीरप्राणमनोबुद्धीनां शुद्धिर्भवति, तदनन्तरं तत्त्वस्य परिचयं योगी प्राप्नोति।

"तमक्रतुः पश्यति वीतशोको धातुप्रसादान्महिमानमात्मनः।"

संकल्पादि दोषेभ्यो विरहितो भूत्वा शरीरधातुशुद्ध्यनन्तरं शोकरहितः साधकः परमात्मानं पश्यति। एतत्सर्वमभ्यासेनैव लभ्यते।

समस्तभागानामाधारभूतदण्डाकारः स्थितः। (१) सर्वाधस्तादा-
धारपद्मस्य चिन्तनं योगी करोति यत् हि गुदेन्द्रियात्किञ्चिदूर्ध्वे
विद्यते। तस्मिन् कमले चत्वारि दलानि सन्ति, यत्र प्रत्येकस्मिन्
पत्रे व, श, ष, स—इमे एकैकं वर्णाः सन्ति। ब्रह्मा डाकिनी चास्य
देवते स्तः। पृथिवीतत्त्वस्य चतुष्कोणाकार'लं'बीजयुक्तस्य मण्ड-
लस्यात्रैव चिन्तनं भवति। स्वयंभूलिङ्गेन वेष्टितः कुण्डलिन्या
शक्तेर्वासो विद्यते। एतस्याश्चिन्तनेन योगीतत्त्वज्ञो भवति, सर्वासां
सिद्धीनां च पात्रं भवति। (२) लिङ्गेन्द्रियस्य मूले आधारपद्मा-
दूर्ध्वं स्वाधिष्ठानपद्मं वर्त्तते, अस्य रक्तवर्णो विद्यते। ब, भ, म,
य, र, ल—एतैः षड्भिर्वर्णैर्भूषितानि षड्दलानि तत्र सन्ति। जल-
तत्त्वस्य 'वं' बीजं विष्णुः राकिनी चास्य देवते स्तः। (३) मणि-
पूराख्यं तृतीयं पद्मम्, नभिरेतस्य स्थानं भवति। अत्र दशदलानि
सन्ति, नीलोऽस्य विद्यते वर्णः। ड, ढ, ण, त, थ, द, ध, न, प, फ,
एतैर्वर्णैरिदं विभूषितमस्ति। रुद्रो लाकिनी चास्य देवते स्तः।
अग्नेस्त्रिकोणाकारस्य 'रं' बीजयुक्तमण्डलस्यात्र चिन्तनं भवति।
(४) अनाहतनामकं वक्षःस्थले ईषद्रक्तवर्णं पद्मं विद्यते।
द्वादशदलानि क, ख, ग, घ, ङ, च, छ, ज, झ, ञ, ट, ठ एभि-
र्वर्णैर्भूषितानि सन्ति। तदिदं षट्कोणेन हरितवर्णेन 'यं' बीजेन
युक्तम्, वायुतत्त्वस्य चिन्तनमत्रैव भवति। ईशानः काकिनी चास्य
देवते स्तः। अत्रैव बाणलिङ्गस्य स्थितिरस्ति। एतस्य किंचिदूर्ध्वमष्ट-
दलकमले स्वेष्टदेवस्य ध्यानं क्रियते। (५) कण्ठे स्थितं विशुद्ध-
चक्रं धूमवर्णयुतं—अ, आ, इ, ई, उ, ऊ, ऋ, ॠ, ऌ, ॡ, ए,
ऐ, ओ, औ, अं, अः—एभि षोडशस्वरैश्च युतं भवति। तथा
'हं' बीजयुक्तस्याकाशतत्त्वस्यात्र चिन्तनं क्रियते। सदाशिवः
हाकिनी चास्य देवते स्तः। कलङ्करहितस्य पूर्णचन्द्रस्य चिन्तनं
तथा जीवस्य वासोऽत्रैव विद्यते। (६) भ्रूमध्ये द्विदलं पद्मम्, यत्
'ह' 'क्ष' इत्येतद्वर्णद्वयभूषितमस्ति। शाकिनी अर्धनारीनटेश्वरश्चात्र

देवते स्तः। इतरनामकं लिङ्गमत्रैव विद्यते। मनसो वासोऽत्रैव मन्यते। ॐ कारबीजस्य चिन्तनमत्रैव भवति। (७) सहस्रार-पद्मस्य स्थितिर्ब्रह्माण्डे विद्यते। अत्र सहस्रदलानि सन्ति। सम्पूर्णा वर्णाः २० वारमावृत्यात्र स्थिताः। 'ह', 'ल', 'क्ष' एते त्रयो वर्णाः मध्ये सन्ति। एतस्य मध्ये द्वादशकमले त्रिकोणाकारं गुरो सिंहा-सनमस्ति। परमशिवस्य परायाः शक्तेश्च चिन्तनं गुरुरूपे क्रियते। संक्षेपतः षट्चक्रनिरूपणस्येदं तत्त्वमस्ति। कुण्डलिनीशक्तेर्जागरणे-नैतेषामारोपे लये च योगी चिन्तनसमर्थो भवति।

१३. एतासां तिसृणां नाडीनां वर्णनं वेदेऽपि यज्ञरूपेण कृतमस्ति—

सुषुम्णः सूर्यरश्मिश्चंद्रमागंधर्व—स्तस्य नक्षत्राणि अप्सरसोभेकुरयो नाम स न इदं ब्रह्मक्षत्रं पातु तस्मै स्वाहा वाट् ताभ्यः स्वाहा।

[यजुः १८-४०]

सुषुम्ना अग्निर्यस्मिन् यज्ञे दीप्यते तेनैव सूर्यश्चन्द्रः नक्षत्राणि च प्रकाशितानि भूत्वा संसारस्य रक्षां कुर्वन्ति। आध्यात्मिके रूपे इयमेवाग्नितत्त्वयुता सुषुम्ना कथ्यते।

राजयोगः

१४. अन्तःकरणवृत्तयः सात्त्विकराजसतामसेति भागत्रये विभक्तुं शक्यन्ते, येषु राजसतामसेति द्विविधवृत्तीनां सर्वथा निरोधं कृत्वा सात्त्विकवृत्तीनां प्रवाहो यः सुखात्मकः ज्ञानात्मकश्च भवति तस्या-नवच्छिन्नरूपेण परिचालनमेव वास्तवरूपेण सम्प्रज्ञातयोगो भवति। एतयोर्द्विविधवृत्त्योर्निरोधो विचारेणैव सम्पाद्यो भवति। अतएवा-सनप्राणायामादीनामस्मिन् योगेऽपेक्षा न जायते। एतेन महान्तं पराक्रमं योगी प्राप्नोति, यतोहि—

"यथा क्रतुः पुरुषो भवति।"

अर्थात् यादृशी भावना पुरुषस्य भवति तथैव स सञ्जायते। अभ्यासेनानेन कीदृशोऽपि विकारो यदा मनसि न तिष्ठेत् तदा ज्ञातव्यं यद् योगः सिद्धो जातः। मनसः पवित्रताया विषये योगिभिर्बोधितं यत्—पूर्णं युवानं सुन्दरीं नवयौवनां हावभावयुतां युवतीञ्चैकान्ते रहस्यपूर्णां वार्तां कुर्वन्तौ विलोक्यापि मनसि यदि कीदृशोऽपि क्षोभो दुर्भावना वा न समुत्पन्ना भवेत् तदा ज्ञातव्यं यदस्मदीयो योगः सिद्धो जातः। याथार्थ्येनायमेव योगः सर्वश्रेष्ठो विद्यते। अयमेव राजयोगः कथ्यते। सर्वप्रकाराणां वृत्तीनां निरोधोऽसम्प्रज्ञात योग उच्यते। धारणाध्यानसमाधिभिस्त्रिभिः साधनैर्योगः सिद्धो भवति येष्वसम्प्रज्ञातः समाधिर्योगस्यान्तरङ्गं साधनमस्ति, सम्प्रज्ञातश्चबहिरङ्गं साधनम्भवति। एतेनैव सिद्धयः प्राप्यन्ते, विषयोऽयं योगदर्शनस्य विभूतिपादे विस्तरेणोक्तः। समस्तानां वृत्तीनां निरोधानन्तरं समाधिसुखस्यानुभवायैका वृत्तिर्भवति, तयैव समाधौ ब्रह्मानन्दस्यानुभवं योगी प्राप्नोति।

१५. वृत्तिः क्लिष्टाक्लिष्टभेदेन द्विविधा भवति। क्लेशयुक्ता क्लिष्टा तद्भिन्ना चाक्लिष्टा कथ्यते। अविद्याऽस्मितारागद्वेषाऽभिनिवेशाः पंच क्लेशाः कथ्यन्ते। (१) विपरीतं ज्ञानमेव भवत्यविद्या, इयमस्ति समस्तक्लेशानां जननी, अत एवेयं क्लेशानां क्षेत्रभूता कथ्यते। (२) प्रकृतिपुरुषयोर्विभागमविज्ञाय द्वयोरभिन्नताबोधेनास्मितानामकस्य क्लेशस्योत्पत्तिर्जायते। (३) अनुकूलेषु विषयेषु प्रीतिरेव रागः कथ्यते। (४) प्रतिकूलेषु विषयेषु द्वेषो भवति। (५) मृत्योर्भयमभिनिवेशो भवति। निरोधमेकाग्रतां च या वृत्तयो विषयीकुर्वन्ति ता अक्लिष्टा उच्यन्ते। शुद्धज्ञानात्मकान्तःकरणपरिणामभूताः सात्त्विका वृत्तय एव निरोधमेकाग्रताञ्च द्रढीकुर्वन्ति। क्षिप्ता मूढाः विक्षिप्ता वृत्तयस्तामसराजसक्रमेणात्पद्यन्ते। एतासु वृत्तिषु योगो न भवति। विक्षिप्तवृत्तीनां निरोधा-

वस्थायामानयनाय योगस्याष्टाङ्गसाधनानामुपदेशः प्रदत्तोऽस्ति। विषयप्रकाशकस्यान्तःकरणस्य ज्ञानात्मकः परिणामो वृत्तिरुच्यते। प्रकृतिःस्वाभाविकरीत्या स्वीयं कार्यं सम्पादयति, तस्यास्तादृशः स्वभावो निरोद्धुं न शक्यते—

"प्रकृतिं यांति भूतानि निग्रहः किं करिष्यति।"

तथापि जीवोऽज्ञानमूलकं रागद्वेषपूर्णं व्यवहारं करोति, स एव क्लेशहेतुरस्ति। अतो **"योगश्चित्तवृत्तिनिरोधः"** सूत्रेऽस्मिंस्तेषामेव निरोधः कथितः। अतएवाऽभ्यासस्योपदेशः सम्पाद्यते।

१६. स्वेष्टरूपस्य परमात्मनश्चिन्तनमभ्यास उच्यते अथवा ध्येय विरोधिनं ज्ञानं निरुध्य स्वाभीष्टविषये वृत्तेर्निरन्तरप्रवाहणमभ्यासो भवति। अभ्यासो द्विविधो भवति, एको लौकिकः, द्वितीयः पारमार्थिकः। लौकिकेनावधानेन संसारस्य कार्याणि सिध्यन्ति। योगे सिद्धीनां वर्णनमपि तादृशमेवाऽस्ति। तेनैश्वर्यमात्रस्य प्राप्तिर्भवति, तच्च क्षणिकमस्ति। एतेषु मुमुक्षुणा वैराग्यं धारणीयम्। वास्तविकं फलन्तु परमात्मन्येव वृत्तेः प्रवर्तनेन भवति। तदिदं नित्यस्य स्थायिनः फलस्य प्रदायकं भवति। अतस्तदर्थमेवाऽभ्यासः कर्तव्यः। आहारस्य संयमेन स्थूलान्नमयस्य शरीरस्य संयमः, प्राणायामेन प्राणस्य संयमाऽभ्यासः, ध्यानाऽभ्यासेन मनसो निरोधः विवेकपूर्वकेण विचारेण बुद्धेरेकाग्रताया अभ्यासानन्तरं शरीरप्राणमनोबुद्धीनां शुद्धिर्भवति, तदनन्तरं तत्त्वस्य परिचयं योगी प्राप्नोति।

"तमक्रतुः पश्यति वीतशोको धातुप्रसादान्महिमानमात्मनः।"

संकल्पादि दोषेभ्यो विरहितो भूत्वा शरीरधातुशुद्ध्यनन्तरं शोकरहितः साधकः परमात्मानं पश्यति। एतत्सर्वमभ्यासेनैव लभ्यते।

१७. लौकिकेषु पारलौकिकेषु च भोगेषु विरसताया अनुभवकरणमेव वैराग्यमुच्यते। केनापि वस्तुना सह घृणया द्वषेण वाऽप्रीतिकरभावोत्पत्तिरेव न भवति वैराग्यम्। विषयेन्द्रिययोः संयोगेन रागस्योत्पत्तिर्भवति। विषयाणां नश्वरत्वविचारस्य चेतसि द्रढीकरणम्, विषयेषु च चेतसः समासक्तेर्वारणमेव यथार्थतया वैराग्यमस्ति। केवलं बाह्यचिह्नेष्वेव वैराग्यबोधो मिथ्या भवति। वैराग्यविषये कस्यचन विदुष एकस्य यथार्था टिप्पणिरेवमस्ति—

"Vairagya distaste for the world and life cessation of attraction to the object of the mind's attachment :—

अर्थात् संसारे जीवने च विरसताया अनुभवकरणम्, विषयैः सह चेतस आसक्तेः परित्याग एव वैराग्यमस्ति।

एवमभ्यासेन वैराग्येण च योगानुकूलवृत्तीनां प्रवाहो निर्मितो भवति, समस्तयोगविघ्नानामभावे जाते च योगी पूर्णां सिद्धिं लभते।

१८. लयः, विक्षेपः, कषायः, रसास्वादश्चैते चत्वारः समाधेर्विरोधिनः सन्ति। अत एवैतेषां दूरीकरणाय यत्नपरेण सावधानतया योगिना यतनीयम्। (१) लयः-लये तावदिष्टस्वरूपाकारवृत्तेरात्माकारवृत्तेर्वाऽभावो भवत्यर्थात् निद्रावृत्तेरुदये जाते ब्रह्मानन्दान्निवृत्तिरेव लयः कथ्यते। (२) विक्षेपः—ध्येयाकारे वृत्तेरस्थैर्य्यभाव एव विक्षेपो भवति, तत्र वृत्तिरितस्ततस्तो विभ्रश्यते। (३) कषायः—बाह्यानामान्तरिकाणाञ्च विषयाणां रागद्वेषजनिताः संस्कारा यदा हृदये समुत्पद्यन्ते तदा ते कषाया उच्यन्ते। (४) रसास्वादः—दुःखाभावमात्रे सुखमिति पक्षधृतिर्ब्रह्मानन्दस्य च परित्यागो रसास्वादो भवति, यतोह्यभ्यासकाले राजसतामसवृत्तीनां निरोधेऽपि सुखमनुभूयते। अतो योगिना तस्माद् दूरे स्थातव्यम्।

१९. अणिमा महिमा लघिमाद्यष्टसिद्धयः पंचतत्त्वानां चिन्तनेन देवतायाः साक्षात्कारेण मन्त्रजपेन समाधिसाधनया च प्राप्यन्ते, तथाप्यहङ्कारस्य बीजोपस्थितेराभिरनर्थसम्भावनया योगिनः पतनमपि सम्भवति। अत एवैतासामुपयोगमधिकारी पुरुष एव कर्तुं शक्नोति। विषयिणः पामरमनुष्याश्च योगसिद्धीनां कृते लालायिता भवन्ति, जानन्ति च यद्वयं प्राकृतभोगे सिद्धीनामुपयोगं करिष्याम इति, अनयैव च भावनया ते साधुमहात्मनां समीपे गच्छन्ति, परन्तेषां भावना निष्फला जायते। न जानन्ति ते अबोधा अज्ञजनाः यत् सिद्धयो योगस्य वस्तूनि सन्ति, भोगात् पराङ्मुखतां विना ता न प्राप्तुं शक्यन्ते। भोगवार्ताभिस्तासां कः सम्बन्धः, प्रत्युत तेन योगस्य विद्यते विरोधः। यस्तावद् योगी विषयिणामेषां पुरुषाणां कथनानुसारं सिद्धीनां प्रयोगमारभते स क्षतिग्रस्तो भवति, तस्मिंश्च क्रोधप्रतिहिंसाभावः समुत्पद्यते येन तस्य पतनं सञ्जायते। पामराणां तृप्तिस्तु नैव सञ्जायते, यतो हि तृष्णायाः समुद्रस्तु तेषां परितस्तरंगितस्तिष्ठति, सिद्धिभिर्लाभे जाते तेषां तृष्णा ततोऽप्यधिकं वर्धते तेषां प्रकृतयश्च विकारं प्राप्नुवन्ति। योगी जानाति यदेते पामरजना अस्मद्भक्ताः परमार्थमार्गे समायान्ति। अस्मिन्नेव भ्रमे निग्रहानुग्रहयोः प्रयोगं समारभते एतेन रागद्वेषोत्पत्त्यनन्तरं योगीपुरुषोऽपि तादृश एव सम्पद्यते। अतो योगिना विषयेऽस्मिन् सावधानेन भाव्यम्।

लय योगः

लययोगस्य लक्षणं हठयोगप्रदीपिकायामित्थं कृतमस्ति—

"अपुनर्वासनोत्थानाल्लयो विषयविस्मृतिः।"

अर्थात् वासनानां पुनरुत्थानस्याभावः विषयाणां विस्मृतिश्च लय उच्यते। ध्येयाकारस्यापि विस्मृतिर्लये सञ्जायते। तात्पर्यमिदं यद्

बाह्याभ्यन्तरविषयाणां विस्मृतिर्लययोगे जायते। लययोगस्य सपादकोटिभेदाः कथ्यन्ते। हठयोगप्रदीपिकायाम् योगतारावलि-ग्रन्थे चास्योल्लेखः कृतः। इडापिङ्गलानाड्योः प्राणप्रवाहे जीव। बहिर्मुखवृत्तिमान् भवति, अयमेव प्राणप्रवाहो यदा सुषुम्नानाड्या-सञ्जायते तदा जीवो लययोगस्य सिद्ध्या परमपदं प्राप्नोति। षण्मुख्या मुद्राया अभ्यासेन लययोगस्य साधना क्रियते। लय-योगस्य चतस्र अवस्थाः सन्ति या आरम्भावस्था, घटावस्था, परि-चयावस्था, निष्पत्त्यवस्थाश्च कथ्यन्ते। प्राणायामस्याभ्यासेन हृदयचक्रे स्थिताया ब्रह्मग्रन्थेर्भेदनमारम्भावस्थाऽस्ति। अस्यामव-स्थायां योगी आभरणानां शिञ्जितस्य नादस्य ध्वनेः श्रवणं करोति। प्राणापानयोरैक्यसंपादनेन विशुद्धिचक्रे स्थिताया विष्णुग्रन्थेर्भेदनं घटावस्थास्ति। अस्यामवस्थायां योगी भेरीसदृशान् शब्दान् शृणोति। आज्ञाचक्रे स्थिताया रुद्रग्रन्थेर्भेदनम्परिचयावस्थाऽस्ति। अस्यामवस्थायाङ्गतो योगी वंशीध्वनिं शृणोति। अन्तिमाऽवस्था-ऽस्तिनिष्पत्त्यवस्था।

शाक्तमते समस्तायाः सृष्टेर्विकासः महाविन्दोर्भवति। महा-विन्दुरयं शिवतत्त्वेन शक्तितत्त्वेन च संयुक्तो विद्यते। एतस्मादेव-महाविन्दोः श्वेतविन्दुः, रक्तविन्दुः, मिश्रविन्दुश्च समुत्पद्यन्ते। श्वेतविन्दुरस्ति शिवतत्त्ववाचकः रक्तविन्दुश्च शक्तितत्त्ववाचकोऽस्ति। मिश्रविन्दुस्तूभयात्मको विद्यते श्वेतविन्दोर्नाद उत्पद्यते, नादाच्च शब्दसृष्टिर्भवति। रक्तविन्दोरर्थसृष्टिरुत्पद्यते। यदा योगी योगा-भ्यासद्वारा सम्पूर्णां शब्दसृष्टिमर्थसृष्टिं च स्वस्मिन् लीनाङ्कुर्वन् स्वयमपि तस्मिन्नेव महाविन्दौ विलीनो भवति तदा स लययोगे सिद्धो भवति।

अर्थसृष्ट्यन्तर्गतानां समस्तभौतिकतत्त्वानां लय आत्मतत्त्वे सञ्जायते। आत्मतत्त्वे तत्त्वानां लयस्य निरूपणमीशोपनिषदि—

"यस्तु सर्वाणि भूतानि आत्मन्येवानु पश्यति।"

इति मन्त्रे स्वीकृतः। पृथिव्या बीजं "लं" इत्यस्ति, अस्य लयो जल तत्त्वे भवति। अस्य तत्त्वस्य लयसिद्धया योगी दैहिक-लाघवस्य सिद्धिं प्राप्नोति। जलतत्त्वस्य "वं" इति बीजस्य लयो-ऽग्नितत्त्वे भवति। एतत्सिद्धया योगी विषयसम्पर्कैरुत्पन्नेषु सुख-दुःखादिभावेषु समत्त्वबुद्धिं प्राप्नोति। अग्नेर्बीजं 'रं' इत्यस्ति, अस्य लयो वायुतत्त्वे भवति। अस्य तत्त्वस्य लयसिद्ध्या योगी गगनगमनादिसिद्धीः प्राप्नोति। आकाशतत्त्वस्य बीजं "हं" इत्यस्ति, एतस्य लयोऽहङ्कारे भवति, अहङ्कारस्य महति, महतः प्रकृतौ प्रकृतेश्चान्ततो लयो भवत्यात्मतत्त्वे।

शब्दसृष्ट्यन्तर्गतानां वर्णानां लयस्य क्रम आज्ञाचक्रात्प्रारभ्यते। 'क्षं' इत्यस्य 'लं' इत्यस्मिन्, 'लं' इत्यस्य 'हं' इत्यस्मिन् लयः आज्ञा-चक्रे भवति। एतदनन्तरं 'हं' इत्यस्य लयः 'सं' इत्यस्मिन् 'सं' इत्यस्य 'षं' इत्यस्मिन्, 'षं' इत्यस्य 'शं' इत्यस्मिन्, 'शं' इत्यस्य 'वं' इत्यस्मिन्, लयो मूलाधारचक्रे भवति। 'वं' इत्यस्य 'लं' इत्य-स्मिन्, 'लं' इत्यस्य 'रं' इत्यस्मिन्, 'रं' इत्यस्य 'यं' इत्यस्मिन्, 'यं' इत्यस्य 'भं' इत्यस्मिन्, 'भं' इत्यस्य 'बं' इत्यस्मिन् लयः स्वाधिष्ठान-चक्रे भवति। 'बं' इत्यस्य 'फं' इत्यस्मिन्, 'फं' इत्यस्य 'पं' इत्य-स्मिन्, 'पं' इत्यस्य 'नं' इत्यस्मिन्, 'नं' इत्यस्य 'धं' इत्यस्मिन्, 'धं' इत्यस्य 'दं' इत्यस्मिन्, 'दं' इत्यस्य 'थं' इत्यस्मिन्, 'थं' इत्यस्य 'तं' इत्यस्मिन्, 'तं' इत्यस्य 'णं' इत्यस्मिन्, 'णं' इत्यस्य 'ढं' इत्य-स्मिन्, 'ढं' इत्यस्य 'डं' इत्यस्मिन् लयो मणिपूरचक्रे भवति। 'डं' इत्यस्य 'ठं' इत्यस्मिन्, 'ठं' इत्यस्य 'टं' इत्यस्मिन्, 'टं' इत्यस्य 'ञं' इत्यस्मिन्, 'ञं' इत्यस्य 'झं' इत्यस्मिन्, 'झं' इत्यस्य 'जं' इत्य-स्मिन्, 'जं' इत्यस्य 'छं' इत्यस्मिन्, 'छं' इत्यस्य 'चं' इत्यस्मिन्, 'चं' इत्यस्य 'ङं' इत्यस्मिन्, 'ङं' इत्यस्य 'घं' इत्यस्मिन्, 'घं' इत्यस्य

'गं' इत्यस्मिन्, 'गं' इत्यस्य 'खं' इत्यस्मिन्, 'खं' इत्यस्य 'कं' इत्यस्मिन् लयोऽनाहतचक्रे भवति। 'कं' इत्यस्य 'अः' इत्यस्मिन्, 'अः' इत्यस्य 'अं' इत्यस्मिन्, 'अं' इत्यस्य 'औं' इत्यस्मिन्, 'औं' इत्यस्य 'ओं' इत्यस्मिन्, 'ओं' इत्यस्य 'एं' इत्यस्मिन्, 'एं' इत्यस्य 'एं' इत्यस्मिन्, 'एं' इत्यस्य 'लृं' इत्यस्मिन्, 'लृं' इत्यस्य 'लृं' इत्यस्मिन्, 'लृं' इत्यस्य 'ॠं' इत्यस्मिन्, 'ॠं' इत्यस्य 'ॠं' इत्यस्मिन्, 'ॠं' इत्यस्य 'ऊं' इत्यस्मिन्, 'ऊं' इत्यस्य 'उ॑' इत्यस्मिन्, 'उ॑' इत्यस्य 'इ॑' इत्यस्मिन्, 'इ॑ इत्यस्य 'इ॑' इत्यस्मिन्, 'इ॑' इत्यस्य 'आं' इत्यस्मिन्, 'आं' इत्यस्य 'अं' इत्यस्मिन्, 'अं' इत्यस्य कलायाम्, कलाया अर्धचन्द्रे, अर्धचन्द्रस्य निरोधिकायाम् निरोधिकाया नादे, नादस्य महानादे, महानादस्य आज्ञ्यायाम्, आज्ञ्या व्यापिकायाम्, व्यापिकायाःसुमनायाम् सुमनायाउन्मनायाम् अन्ते चोन्मनाया लयो महाविन्दौ भवति। एवं रीत्या समस्तानां वर्णानां लयस्तस्मिन्नेव महाविन्दौ भवति, यस्मान्महाविन्दोरस्याः शब्दार्थसृष्टेर्विकासः समभूत्। वर्णानां लये जाते षट्चक्राणामभावो जायते यतो हि षट्चक्राणां निर्माणं तु वर्णैरेव भवति।

महाविन्दुरेव महाशून्यमुच्यते। महाशून्यस्यापि त्रीणिस्वरूपाणि सन्ति यानि शून्यातिशून्यमहाशून्यन्युच्यन्ते। अनाहतचक्रे शून्यम्, विशुद्धावतिशून्यम् आज्ञाचक्रे च महाशून्यं ध्यायते। हठयोगस्य साधनेन प्राणनिरोधस्य सम्पादनं भवति, प्राणानां निरोधेन नादानुभूतिर्भवति। कुण्डलिनीशक्तिरपि नवनादस्वरूपाऽस्ति। योगी यदा कुण्डलिनीं शक्तिं जागृतां करोति तदा तस्मै नवप्रकाराणां नादानामनुभूतिर्जायते येषां चिणी, चिण्चिणी, घण्टानादः, शङ्खनादः, तन्त्रीनादः, मृदङ्गनादः, वेणुः, भेरी, मेघादिनामानि कथ्यन्ते। नादानुसन्धानस्याभ्यासे साधकेन सूक्ष्मातिसूक्ष्मतरनादध्वनीनामनुसन्धानं दक्षिणकर्णे विधेयम्। एतेषु सर्वेषु नादध्वनिषु

कस्मिन्नकप्येकस्मिन् ध्वनौ यदा योगिनो मनः स्थिरं भवति तदा तेनैव ध्वनिना सह योगिने लयप्राप्तिर्भवति इदमेव लययोगस्यान्तिमं लक्ष्यमस्ति ।

यत्रकुत्रापि नादेवालगति प्रथमं मनः
तत्रैव सुस्थिरीभूय तेन सार्धं विलीयते

इति द्वितीयः खण्डः

३. उपासना-भक्तिरत्नमणि-ग्रन्थस्य

योगसाधनयाऽन्तःकरणस्य शुद्धौ जातायां चिन्तनस्याधिकारो मनुष्येण सम्प्राप्यते। योगाभ्यासं विनैकाग्रता प्राप्तुं न शक्यते। अत एव योगसाधनायाः पश्चाद् उपासनायां भक्तिमार्गे च प्रवृत्तेरधिकारी भवति मनुष्यः। अतो हेतोर्योगसाधनानां निरूपणानन्तरमुपासनाया विषयो लिख्यते। उपासनयाऽनन्दस्वरूपस्य परमात्मनः साक्षात्कारे जाते साधकः सम्पूर्णैर्दुःखैर्मुक्तः सन्नानन्दितो भवति, अथ च जीवन्मुक्तावस्था समासाद्यते। उपासना सगुणनिर्गुणभेदेन द्विप्रकारा भवति। प्रथमं निर्गुणोपासना लिख्यते, यतोहि ज्ञानस्य साक्षात् हेतुभूता सैवाऽस्ति। सगुणोपासनायाः परम्परासम्बन्धवत्त्वात् निर्गुणानन्तरं तस्याः क्रमः समायाति।

१. मनुष्यो यथा चिन्तयति तथैव सञ्जायते इति श्रुतिसिद्धान्त एवोपासनाया मूलमस्ति। अमुमेव भावं पुरस्कृत्योपासनायाः सृष्टिर्जाता। यथा संसारे विदुषामुपासनाकर्ता विद्वान्, धनिकानामुपासयिता धनवान्, मूढानामुपासयिता मूढदुष्टखलाद्यवस्थाः प्राप्नोति, एवमेव नामरूपात्मकं संसारं दुःखमयं विज्ञाय विरक्तः पुरुषः शान्तिलाभाय सर्वजगदधिष्ठानस्य सच्चिदानन्दस्य परमात्मनो ध्यानं विधाय समस्तैर्दुःखैर्विमुच्यते। परम्परमात्मनः स्वरूपं निराकारम्, व्यापकम्, इन्द्रियेभ्यः परमस्ति, तं मानवो यथार्थतया ज्ञातुं न शक्नोति। अत एव तस्य ज्ञानाय विभिन्ना रीतयः सम्प्रदायाश्च निर्मिताः सन्ति, ये च वस्तुतः सर्वे यथार्थाः सन्ति, तेषु कस्याश्चिदप्यनुपयुक्तताया द्योतनमयोग्यमेवास्ति। 'अहं' रूपेणाऽस्मिन् शरीरे ब्रह्मण एव चेतनं रूपं व्यक्तं भवति। अतएव केनाऽपि प्रकारेण ब्रह्मणा मूर्तिः स्वस्माद् भिन्ना नास्तीति विज्ञाय स्वात्मैव ब्रह्मभावनया चिन्तनीयः। एतेनाद्वैतज्ञानोत्पत्त्यनन्तरं साधकस्य

सर्वाणि बन्धनानि त्रुट्यन्ति। ॐकारस्य साहाय्येन 'सोऽहम्'—अहं ब्रह्म वा शिवो वाऽस्मि, भावस्यास्य मुहुर्मुहुश्चिन्तनं क्रियते। स्मरणीयम्, यदत्र 'अहम्' इत्यस्यार्थः शरीरेन्द्रियमनोबुद्ध्यादिर्नास्ति, एभ्यः परं यच्चेतनं तत्त्वमस्ति तदे'वाहं' शब्देनोपास्यं मन्यते। अनेनाभ्यासेन जोवभावस्य निवृत्त्यनन्तरं ब्रह्मभावस्य सिद्धिर्भवति। यथा विश्वतेजसप्राज्ञेति जोवस्यावस्थानां नामानि सन्ति तथैव विराट्हिरण्यगर्भान्तर्यामीति त्रयो भावाः समष्टिरूपे ईश्वरे सन्ति। तथैव ॐकारेऽपि अ, उ, म एते त्रयो वर्णा जोवस्य ब्रह्मणश्च द्वयोरपि भावानामभेदबोधकाः सन्ति। अकारमात्रया जीवस्य विश्वभावस्य विराजि, उकारेण तैजसभावस्य हिरण्यगर्भे, मकारेण प्राज्ञभावस्य हिरण्यगर्भे लयचिन्तनं विधेयं भवति। ॐकारस्य चतुर्थार्ऽधमात्रा व्यवहारातीताऽस्ति, तया लक्ष्यरूपस्य सच्चिदानन्दस्य निर्गुणसगुणयोरुभयोरपि रूपयोश्चिन्तनम्, तथा तस्यैव विराड्भावस्य हिरण्यगर्भे, हिरण्यगर्भभावस्यान्तर्यामिन्यन्तर्यामिभावस्य तुरीयब्रह्मणि च क्रमशो लयं कृत्वा एतादृशेन दृढेनाभ्यासेनात्र जीवनकाल एव ब्रह्मभावस्याद्वैतस्य साक्षात्कारस्तन्मयत्त्वं च सम्प्राप्यते, येन सम्पूर्णकर्माणि भस्मसाद्भवन्ति पुरुषश्च जीवन्मुक्तः सञ्जायते। सङ्क्षिप्तरूपे सेयमेव निर्गुणोपासना कथ्यते। द्वैतभावेनाऽपि निराकारोपासना क्रियते। नानक-कबीर-दादू-दयानन्दप्रभृतयो महात्मानो द्वैतभावनायुक्तां निराकारोपासनामेव मन्यन्ते। यथा साकारवादिनः स्वामिसेवकभावं मन्यन्ते तथैवैतेऽपि मन्यन्ते। ईसाईधर्मे इस्लामधर्मे चापि तथैव मन्यते। इयमस्त्युत्तमा मानसिकी सात्त्विकभावना। श्रद्धाविश्वासयोराधिक्येन तीव्राभ्यासकरणे समुत्साहेन चात्यन्तं शीघ्रतया सिद्धिर्भवति।

२. सगुणा साकारोपासना वाऽत्यन्तं सरलाऽस्ति। भगवत्तत्त्वस्यास्य भावस्य साक्षात्कारकारणं मुख्यतस्तस्य कृपैव कथ्यते,

तथाप्यखण्डेन भजनेन सा कृपा प्राप्यते। नामजपेन साधकः स्वाभीष्टं रूपं प्रत्यक्षं कुरुते। नाम्नो नामिनश्चाभेदोऽस्ति, भावमिमं हृदये निधायानन्यभावेन धारणा कार्या, स्वीयं सर्वस्वं श्रीभगवते समर्पणीयम्, किंबहुना जीवनमपि तदर्थमेव ध्यायेत्। एतादृश्यां भावनायां दृढायां सत्यां कीदृशोऽपि भवेदधमस्तस्य शीघ्रमेवोद्धारो भवति।

क्षिप्रं भवति धर्मात्मा शश्वच्छान्तिं निगच्छति।
कौन्तेय प्रतिजानीहि न मे भक्तः प्रणश्यति॥

शीघ्रमेवास्मत्स्मरणकर्ता पापीमनुष्योऽपि धर्मात्मा भवति। अहं प्रतिज्ञापुरस्सरं वदामि, मम भक्तः कदापि नाशं न प्राप्नोति, तस्मै च शीघ्रमेव शान्तिर्मिलति।

तेषामहं समुद्धर्ता मृत्युसंसारसागरात्।

मृत्युग्रस्तात् संसारादहं तस्य समुद्धारकर्ता भवामि।

भक्तास्तेऽतीव मे प्रियाः।

अर्थात् ते भक्ता मह्यमतीव रोचन्ते।

"अनन्याश्चिन्तयन्तो माम्" इत्यादिषु गीताप्रसङ्गेषु एतस्यैव स्मरणं कृतमस्ति। एते भक्ताः श्रीनारायणायात्यन्तं प्रियाः सन्ति। एतस्य भावस्य व्यक्तये नवधा भक्तिः स्वीकृताऽस्ति।

१. श्रीभगवतो गुणानामत्यन्तश्रद्धया श्रवणम्, २. तद्दिव्यचरित्राणां तन्नाम्नश्च कीर्तनम् ३. मनसि भगवद्रूपस्य स्मरणम् ४. तच्चरणसेवनम् ५. विविधैरुपचारैरर्चनम् ६. अनेकैः स्तोत्रैः पदैश्च वन्दनम् ७. तद्दास्यभावे कैङ्कर्य एव वा प्रसन्नताऽनुभवः ८. सख्यभावस्थापनम् ९. आत्मनिवेदनमथवा स्वसर्वस्वस्य तस्मै समर्पणम्। एतेषामाचरणेन प्रियताया व्यक्तिर्भवति। निर्गुणोपासना-

कठिना विद्यते यतो हि नामरूपाभिमानस्य निवृत्तिरत्यन्तं कठिना भवति। नामरूपाभिमाननिवृत्तिं विना निर्गुणोपासना न भवितुमर्हति। सगुणोपासनायामियं कठिनता दूरीकृता, अर्थात् ब्रह्म नामरूप विशिष्टं सत् भक्तानुकूलाः क्रियाः करोति। अतएवाऽत्यन्तं-प्रेमास्पदा इमे व्यवहारा भक्तिमार्गे मताः सन्ति। इयमेव बैडाली धृतिः कथ्यते। यथा बिडाली स्वोयलघुशिशूनां स्वयमेव चिन्तां करोति, शिशवस्तु सर्वंव्यवहारं त्यक्त्वा केवलं स्वमातुरेव स्मरणं कुर्वन्ति। निर्गुणोपासनायां तदेतन्नास्ति, सा वानरो धृतिः कथ्यते, यथा वानर्याः शिशुः स्वीयां मातरं स्वप्रयत्नेनैव गृह्णाति, माता तस्य तथाविधं चिन्तनं न करोति यथा बिडाली स्वशिशुमेकस्थानाद-परस्थाने मुखे स्थापयित्वा नयन्ती प्रदर्शयति। वानरो स्वशिशूनां तथाविधं चिन्तनं न करोति। अतएव सगुणोपासना सरलाऽस्ति। गीतायामपि—

क्लेशोऽधिकतरस्तेषामव्यक्तासक्तचेतसाम् इति कथितम्।

अर्थादव्यक्ते निराकारे चित्तार्पणं कुर्वतामधिकः क्लेशो भवति। तथापि प्राप्तव्यस्य ब्रह्मण एकत्वान्मूले कोऽपि भेदो नाऽस्ति। केवलं साधनेष्वेव भेदो भवति। शिव-शक्ति-गणेश-सूर्यादिव्यक्तयः सगुण-स्यैव ब्रह्मणः सन्ति। अतएवैते सर्वेऽप्युपासकाः सगुणोपासका एव, एकैव गतिश्च भवति तेषाम्।

३. अनन्तशक्तिघनेन परमात्मना स्वनानाशक्तिभिः प्रत्येकः पदार्थ आपूरितः। प्रत्येकः पदार्थः स्थूले सूक्ष्मे च रूपे स्थितोऽपि सन् चैतन्यशक्तिं ब्रह्मानपेक्ष्य स्वीयमस्तित्वं धारयितुं न शक्नोति। स्थूले जगति यामिमामनेकवैचित्र्यपूर्णसूक्ष्मतांभरितां कलाकुशलतां दृष्ट्वा वयमाश्चर्यचकितास्तिष्ठामो यदेतद्रचना वैचित्र्यं कथञ्जातम् केनैतत्किमर्थं कृतम्, एतत्सर्वं मनुष्यबुद्धेरतीतमस्ति। इतोऽप्यत्यधिकं

विद्यते सूक्ष्ममान्तरजगतो रहस्यम्। परन्तु तस्य ज्ञानं विना योग-मुपासनां वा न संभवति। ब्रह्मा विष्णुर्महेशश्चैते त्रयोऽपिदेवास्तत्र जगति मूर्तिमद्रूपेण तिष्ठन्ति। अनेके देवाः ऋषयः, सिद्धाः, साध्याः, किन्नराः, गन्धर्वाः, पितरः, भूताः पिशाचादयश्च सर्वे तस्मिन्नेव सूक्ष्मसंसारे स्थिताः सन्तः स्वस्वाधिकारानुसारमस्मिन्-स्थूले जगति शासनं कुर्वन्ति। एतेषु बहवः क्रूरस्वभावा देवाः सन्ति ये रुद्रेण सह तिष्ठन्ति। ब्रह्मणा सह सौम्यस्वभाववन्तः विष्णुना च सह सौम्यतरस्वभावा देवास्तिष्ठन्ति। यथार्थ्येनैषामेव त्रयाणां देवानां सूक्ष्मे जगति पूर्णं प्रभुत्वमस्ति। स्थूले जगति यत्किमपि शुभाशुभं दृश्यजातमुपस्थितम्भवति तस्य कारणमिदं सूक्ष्मं जगदे-वाऽस्ति। अतएव वेदे विष्णुदेवतात्मकैर्मन्त्रैस्तथा रुद्राध्यायस्थैर्मन्त्रै-रनेकविधैश्वर्यप्राप्तये कष्टनिवारणाय च विष्णो रुद्रस्य प्रार्थना करणस्याज्ञा प्रदत्ता तथा देवानां मूर्तः स्वरूपस्य निर्णयश्चापि वेदे बहुभिर्मन्त्रैः प्रदर्शितो यदमुककार्यस्य सम्पादयिता देवोऽमुक-प्रकारया पूजनसामग्र्या प्रसीदति, तस्य च स्वरूपमीदृशमस्ति। वेदान्तदर्शनस्य मीमांसादर्शनस्य च देवताधिकरणे देवतातत्त्वस्य निर्णयः कृतो विद्यते। इदमेव तत्त्वं गृहीत्वा मूर्तिपूजनस्योपासना प्रवृत्ता। गीतायामपि एकस्य ब्रह्मण उपासना, देवानामुपासना, यक्षराक्षसानामुपासना, भूतप्रेतानामुपासना चैते चत्वार उपासना-क्रमाः कथिताः। वस्तुतश्चतसृष्वप्येतास्ववस्थासु एकस्यैव ब्रह्मणो भक्तिर्जायते तथापि फलकामनया दूषितान्तःकरणा उपासकास्तथा न जानन्ति। ते विन्दन्ति यदमुकया देवतया, यक्षेण, भूतेन वाऽ-स्मत्कार्यं साधितमयं च फलप्रदाने स्वतन्त्रोऽस्ति, परमेतन्नास्ति। "फलमत उत्पत्तेः" वेदान्तसूत्रेणानेनैतद् बोध्यते यदेकं व्यापकं परब्रह्मैव फलप्रदातृ अस्ति "ब्रह्मदृष्टिरुत्कर्षात्" वेदान्तसूत्रेऽस्मिन् प्रतिमादावुत्कृष्टफलप्राप्त्यर्थं ब्रह्मदृष्टेर्विधानं कृतमस्ति। अतएव

ब्रह्मदृष्ट्यैवोपासना श्रेष्ठाऽस्ति अवशिष्टास्तिस्रो न्यूनकोटौ सन्ति। अतएव गीतायामुक्तम्—"यजन्त्यविधिपूर्वकम्" अर्थाद् ब्रह्मणोतिरिच्याविधिपूर्वकं विभिन्नदेवानां पूजनं ते साधकाः कुर्वन्ति। पुराणेषु तन्त्रग्रन्थेषु च विषयोऽयमत्यन्तं विस्तृते परिष्कृते च रूपे कथितः। देवतानां स्वरूपं देवमूर्तीनां च ध्येयक्रमः स्पष्टे रूपे तत्र प्राप्यते। यथैकं सुन्दरं पुरुषं स्त्रियं वा दृष्ट्वा सौम्यभावस्योदयो भवति, मल्लपुरुषं दृष्ट्वा वीरभावस्य तथा साधुमहात्मनो दृष्ट्वा शान्तभावः परमात्मनश्च स्मरणं जायते तथैवैताभिर्मूर्तिभिरनेकानां दैवभावानामुद्गमो भवति। मानवजीवने आवश्यकं मत्वैवैते क्रमा आविष्कृताः सन्ति। एतेन कस्यापि पाखण्डस्य, दम्भस्य स्वार्थसिद्धेर्वोद्देश्यं नाऽस्ति। यद्यद्य कोऽपि तथा करोति स पुरुषः समाजो वा तदर्थमुत्तरदायी भवति, तेन सिद्धान्तोऽयं दूषितो नाऽस्ति। अस्या मूर्तिकल्पनाया विचारेण पूर्वाचार्याणामपूर्वा बुद्धिचतुरता प्रतीयते। उग्रभावानामभिव्यक्त्यै हनुमद् भैरवदुर्गाकाल्यादिमूर्तयो विरचिताः। सौम्यभावानामभिव्यक्तये नारायण-शङ्कर-सरस्वतीलक्ष्म्यादीनामुल्लेखो जातः। वस्तुतस्तदिदं विचित्रमस्ति शिल्पकर्म यत् सूक्ष्मजगतः स्थूलजगता सम्बन्धं स्थापयति। अस्य तत्त्वस्य विचारं परित्यज्य बहवो मनुष्या विज्ञानस्यास्य विरोधिनः सञ्जाताः, येनास्य सत्यमपि लुप्तम्भवति।

४. प्रधानदेवानां ३३ संख्या समाम्नाताऽस्ति। ११ रुद्राः, १२ आदित्याः, ८ वसवः इन्द्रस्य प्रजापतेश्च क्रमेणैषां विभागः कृतः। एतेष्वपि विद्यते गुणप्रधानभावः। ये प्रधाना देवाः सन्ति तेषां गणना विभूतियोगे गीताया दशमाध्याये श्रीवासुदेवेन बोधिता। तस्य ध्यानपूर्वकविचारेणेदं रहस्यं विज्ञायते यद् ऋषिभिर्विभिन्नदेवीभिर्देवैश्च सहानुकूलताया अनुभवं कृत्वा कुलधर्माऽभ्यन्तरे कुलदेवानां कुलदेवीनाञ्च सम्बन्धं स्थापयित्वा सन्तानरूपासु

प्रजास्वेते उपास्या कथिता यदमुके कुले शिवविष्णुदुर्गास्कन्दादि-कुलदेवानां तथा भिन्नभिन्नदेवीनां पूजनं योग्यमस्ति। तथाविधो निर्णयो वस्तुतस्तत्त्वज्ञानेनैव सञ्जातः। एवं पूजनेन कुलधर्मस्य योगक्षेमप्रणाली सुचारुरूपेण चलेदित्यभिप्रायेणैवैतन्नियतम्। एवम-करणे कुलधर्मस्य विनाशः कथितस्तेन च पतनं भवति। अत्रैव श्राद्धाख्यं पितृकर्मापि कथितम्। वेदपुराणयोरयं सन्दर्भोऽनेकवारं स्मारकधिया समायातः।

देवान् भावयताऽनेन ते देवा भावयन्तु वः।"

इति गीतावचनस्याप्ययमेव भावोऽस्ति।

५. नानाविधोपासनाप्रणाल्या वैदिकधर्मे समावेशस्येदमप्यस्ति कारणं यत् सृष्टिरियं नानाविधा विद्यते। एक एव प्रकारः सर्वेषा-मनुकूलो न भवितुमर्हति। वस्तुत एकयैव यष्ट्या सर्वेषां सञ्चालनं कदाप्युचितं न भवति। सृष्टिरियं विद्यते पञ्चतत्त्वात्मिका, अतः पञ्चतत्त्वानुसारेणैकमेव ब्रह्म पञ्चधोपास्यं कथितम्। विष्णुसूर्य-शक्तिशिवगणेशानां देवानां निर्णयस्तेषां स्वरूपनिर्णयश्च तत्त्वक्रमे-णैव जातः। नीलोवर्ण आकाशस्य विद्यतेऽतएव विष्णोर्मूर्तिः-श्यामवर्णा भवति। वायुतत्त्वस्य हरितो वर्ण इति सूर्यरूपेण प्राणो-पासनायां हरितो वर्णः वायोः कथितः, स्वरोदयेऽस्य निर्णयो विद्यते। दुर्गायाश्शक्तेर्वा मूर्तिरग्नितत्त्वयुता भवति, अतएवास्याः प्रायो रक्तो वर्णः कथ्यते। हनुमतो भैरवस्य चाप्यत्रैव समावेशः। जलतत्त्वानुसारेण शिवमूर्तिर्विद्यते, अतएवेयं शुभ्रवर्णा भवति जलञ्च प्राधान्येन तत्र समर्प्यते। गणेशस्य मूर्तिः पृथिव्या भवति, अतएवेयं स्थूलाकारे निर्मीयते, इयं रक्तपीतोभयवर्णयोर्निर्मीयते। एवमेतैः पञ्चभिर्देवैः सह साधकानामैक्यं विज्ञायोपासना क्रियते, तदैव यथार्थं फलं भवति। वस्तुतश्चिन्तनस्य सुलभतायै सोऽयं क्रमो निश्चितः। अनेन कोऽपीश्वरपञ्चकं पृथक् पृथक् न विज्ञायेत

अतएव वारंवारमीश्वरैकत्वस्य स्मरणं शास्त्रेषु कारितम्। वस्तुतः प्रसङ्गोऽयमतीव रहस्यमयोऽस्ति। राम-कृष्ण-शिव-विष्णु-शक्ति-सूर्य गणेशादिनामभिर्येषां रहस्यमयानामर्थानां बोधो भवति, तत्तद् ग्रन्थानुसारेणानेकेषां मन्त्र-स्तोत्र-कवचाख्यानचरितानां तथा विस्तृतपुराणग्रन्थानां सृष्टिर्जाता। निष्पक्षतया महर्षिणा व्यासेन स्वतन्त्ररूपेणैषां देवानां नाम्ना पुराणादि विरचय्य नामार्थानुकूल्येनाध्यात्मिक-दैविक-भौतिकवृत्तान्तद्वारा प्रत्येकस्या उपासनाया निर्णयो विहितः। सात्त्विक-राजस-तामस-मिश्रितभावैश्च प्रत्येकस्योपास्यभावस्य व्याख्या कृताऽस्ति। यथा रामोपासनायां रामनाम्नो महत्ताऽङ्गीक्रियते। रामशब्दस्यार्थे रमणकर्ता, सुन्दरः, अभिरामः, सौम्य, इत्यादानां भावानामभिव्यक्तिरस्ति। अमुमेवार्थं लक्ष्यीकृत्य गोस्वामिना तुलसीदासेन रामचरित्रस्य व्याख्या कृता। प्रत्येकस्यामुपासनायां प्रकारचतुष्टयेनेष्टस्य स्वरूपं कथ्यते। (अ) (सात्त्विक-राजसतामसाख्यास्त्रेयोऽपीमे भावा गोतायाः १८ अध्याये २०, २१, २२ श्लोकतः गृहीताः सन्ति) इष्टस्य व्यापकं निराकारमगोचरम्, पूर्णम्, सर्वसामर्थ्ययुक्तम्, वेदान्तप्रतिपाद्यं स्वरूपं तात्त्विकं मुख्यं भवति। इदमेव सात्त्विकं रूपं भावो वा कथ्यते।

बिनु पग चलै सुनै बिनु काना।

इत्यादिषु पद्येष्वदमेव स्वरूपं बोध्यते।

(ब) साधनेन लभ्यं सगुणं साकारम् तथा साधनाङ्गभूतस्य नाम्नो मन्त्रस्य वा प्रतिपादनमस्ति द्वितीयः क्रमः। अत्र मानसक्रियाया प्राधान्यादयं राजसभावलभ्यो वक्तुं शक्यते।

जय सच्चिदानन्द गुणधामा, प्रेम ते प्रकट होंहि हम जाना।

इत्यादि।

तथापि सात्त्विकसुखात्मकवृत्तीनामस्मिन्नपि रूपे प्रधानता तिष्ठति। (स) अवतारद्वारा व्यक्तानि चरितान्यत्यन्तं स्थूले स्वरूपे सर्वैर्द्रष्टव्यानि, तेषामयोध्यामथुराद्यवस्थानेषु प्रकटीभूय नानालीलासम्पादनमप्यस्ति सात्त्विको व्यवहारः, तथापि स्थूलत्वादयं भावस्तामसो वक्तुं शक्यते। (द) अन्यभावैर्मिश्रितस्य स्वेष्टस्य प्रधानता, अन्यभावानां गौणत्वम्, यथा–राज्यारोहणानन्तरं शिवादिभिर्देवैः पूर्णब्रह्मरूपेण श्रीरामचन्द्रस्तुतेर्वर्णनम्, शिवस्य शक्तिभावस्य चाऽप्रधानतया रामोपासनायामुपयोगो वारं वारं ग्रन्थकारेण रामभक्तेभ्यः स्मारितः। अनया रीत्या निवृत्तप्रवृत्त्यादीनां सर्वेषां विहितव्यवहाराणामेकीकरणं कृतमस्ति। ईदृश्येव कृष्ण-शिव-विष्णु-शक्त्यादिदेवानां प्रतिपादकानां पुराणग्रन्थानां व्यवस्थाऽस्ति। अनया रीत्या सर्वेषां स्वातन्त्र्यं सिद्ध्यति। बहवो जनाः पुराणेषु सात्त्विक-राजस-तामस-मिश्रत्वस्य कल्पनां कुर्वन्ति, परन्तु विचारोऽयमेकदेशीय एवास्ति। एते चत्वारो भावाः प्रत्येकस्मिन् पुराणे विद्यन्ते। यत्रैकस्य देवस्य मुख्यताऽस्ति तत्रान्येषां गौणरूपेण वर्णनं भवतीति पुराणानामस्ति सैषा शैली।

६. यथा विद्युदानयनाय ऋणधनात्मकानां द्विविधानां (Negative and Positive) ताराणां युग्ममुपयुज्यते, तथैवोपासनायां भावनाद्वयस्य मिलनेन विना तत्सिद्धिर्नभवितुमर्हति। तत्रैकस्याः प्राधान्यमपरस्या अप्राधान्यं भवति। अतएव प्रधानतयैकस्य देवस्य पुराणेऽपरस्य देवस्य चरितं गौणरूपेण चर्चितमस्ति। गोस्वामिना तुलसीदासेन तत एव रामभक्तानां कृते शिवोपासना कथिता। ईदृश एव क्रमः भागवतशिवपुराणादिग्रन्थेष्वप्यभिमतः। साधनायामपि मुख्यभावेन सह पूरकरूपेण स्वेष्टरूपेण ध्येयेन भिन्नभावनाया मन्त्रोपासनासिद्धीनामत्यन्तं हितकरमुपायं गुरवो बोधयन्ति। अतएव शैवभावे विष्णुरामकृष्णादिभावानामपि

गौणरूपेण ग्रहणं शैवैः कृतम्। एतेन ज्ञायते यत् पुराणसाहित्यमपि परस्परमैक्यं स्थापयदेकस्यैवैश्वरस्य भिन्नैर्भिन्नैर्दृष्टिकोणैर्वर्णनं करोति।

७. परब्रह्मणः परमात्मनः पराशक्त्या योगे जाते परं ब्रह्म सच्चिदानन्दं सगुणं वा कथ्यते। तत्त्वतः पराशक्तिर्ब्रह्म चैकमेवाऽस्ति। अनेनैव योगेन ब्रह्मविष्णुमहेशानां त्रयाणामीश्वारात्मकमूर्तीनां व्यक्तिर्भवति, येषां सविस्तरं वर्णनं पुराणेषु कृतमस्ति। ब्रह्मा कर्मात्मकस्य वेदभागस्य प्रकाशकस्तथा च सृष्टिकर्ता प्रवृत्त्यात्मकेन सरस्वत्या योगेन युक्तः कथितस्तथाप्ययं योगो निवृत्तेः प्रतिपादिकाया ब्रह्मविद्याया, उमामूर्त्याः पार्वत्याः कार्यमस्ति। उत्तमचरिते कथितमस्ति—

शरीरकोशाद्यत्तस्याः पार्वत्या निःसृताऽम्बिका।

[सप्तशती ५।८७]

पार्वत्या अम्बिकायाः शरीरकोशादम्बिकाया निःसरणं जातम् या महासरस्वत्युच्यते। अतएव प्रवृत्यात्मको ब्रह्मसरस्वतीयोगो निवृत्यात्मकस्य शिवपार्वतीयोगस्यैव रूपान्तरम्भवति। रागमूलकत्वाद् ब्रह्मणो रूपं रक्तवर्णम्, तथैतद्विरहाच्छिवस्य स्वच्छं शुभ्रवर्णरूपं मन्यते। ब्रह्मणो हस्ते दण्डेन कमण्डलुना वेदेन मालया तस्य चतुर्मुखत्वेन च संयमस्य, ज्ञानस्य, शुद्धविचारस्य, तपसः, सर्वविधव्यवहारज्ञानस्य च सूचना सम्प्राप्यते। ज्ञानस्य महत्त्वमात्मारामत्वे विद्यते। एतस्य यथार्थः परिचयश्शिवस्य योगिवेशे मिलति। प्रवृत्तिपराङ्मुखत्वमेवास्य रूपस्य महत्त्वम्, ध्याननिष्ठैव च चरमं लक्ष्यमस्ति। अतएव शिवस्य विवाहः पुराणेषु हास्यरूपेणाभिव्यञ्जितः। प्ररूढा प्रवृत्तिरेव ब्रह्मणो विषयोऽस्ति, अत एवोपासनायां ज्ञाने वा ब्रह्मणः स्थानं नास्ति, केवलं कर्मण्येव ब्रह्मा पूजनीयो मतः।

निष्कामेन कर्मणैवोपासनायां ज्ञाने चाधिकारो भवति। इयमवस्था विष्णोर्विद्यते। अस्यां मूर्तावैश्वर्यस्य निवृत्तेश्च भावो व्यवस्थापितोऽस्ति। अस्मिन् पराशक्तिर्लक्ष्मी योगं प्रदत्तवती। अत एवैष लक्ष्मीनारायणयोग उच्यते। प्रवृत्तिनिवृत्योर्विरोधं दूरीकृत्यैतस्मिन् रूपे ऐक्यसद्भावात् त्रिष्वपिरूपेष्वस्य मुख्यता बोधिता। अतएव वैष्णवाचार्या ज्ञानकर्मसमुच्चयं मन्यन्ते परस्परं च द्वयोरविरोधं स्वीकुर्वन्ति। अस्यैव भावस्य निदर्शनं दक्षयज्ञे कृतमस्ति। उमाया देहत्यागे मूलेन शिवस्यापमानेन केवलाया यज्ञविद्याया विध्वंसः सूचितः. शिवस्वरूपे कर्मविद्यायास्त्यागसूचनेन द्वयोर्विरोधस्याभिप्रायो व्यक्तः, विष्णुयोगेन च यज्ञस्य सिद्धिरुक्ता। उमाया देहत्यागेनेदं स्पष्टं ज्ञायते यद् यज्ञविद्या ब्रह्मविद्यां विना स्वस्वरूपं प्राप्तुं न शक्नोति। मुख्यस्य तिरस्कारोऽमुख्यस्यापि तिरस्कार एव भवति। अत एव समुच्चयस्यावश्यकता जाता। कारणं विना कार्यस्य स्थितिर्नसंभवति, अत एवोक्तम्—

यद् विद्यया उपनिषदा तद् बलवत्तरं भवति।

अर्थादुपनिषद् विद्यया युक्ता सती कर्मविद्या बलवती भवति। विषयोऽयं रहस्यान्वितो विद्यते, यद्विषये कथितम्—"चक्षुष्मन्तोऽनुपश्यन्ति" अर्थात् ज्ञानदृष्टिमन्त एव तदिदं ज्ञातुमर्हन्ति, यथार्थमेव चेदम्, तथापि मूर्तित्रितयमिदमीश्वरकोटावेवाऽस्ति, एतासां जीवकोटौ स्वीकरणं नोचितम्।

८. पुराणेष्वेतासु त्रिषु मूर्तिष्वज्ञानस्यापि सम्बन्ध उक्तस्तथाप्येतादृशोदाहरणानि पराशक्त्यपेक्षयैव सङ्गमननीयानि। यथा ब्रह्मणःपूर्णेश्वरत्वाभिमानस्य निवृत्तिः, कृष्णावतारे मोहिनीरूपप्रसङ्गे शिवस्य मोहस्तथा जालन्धरोपाख्याने विष्णौ कामुकताया दोषः प्रदर्शितः। एतासां कथानामभिप्रायस्तेषां देवानां पृथक् पृथगीश्वरत्वस्वीकार एवास्ति। वस्तुतस्तेषां त्रयाणामपि रूपाणां

समानतया स्वीकारे समन्वितरूपे दोषो नास्ति। अत एव कर्म-ज्ञानोपासनानां त्रयाणां समन्वितमेव रूपं पूर्णफलदायकं यथार्थञ्चास्तीति सिद्धयति। अथवैकस्य मुख्यताऽचरणकाल एव विद्यते न परमार्थतः। अतः स्वस्वस्थाने त्रयाणामपि श्रेष्ठता समीचीना भवति। एवं गौणमुख्यभावोऽपि सङ्गच्छते, यतोहि व्यवहारकाले गौणमुख्यभावोऽनिवार्यतां भजते।

९. ब्रह्मविष्णुशिवैः सह स्वाभिन्नशक्तीनां योगो कन्यारूपेण भगिनीरूपेण वा कथितः। ब्रह्मविष्णुरुद्रा अपि शक्तेरेव रूपान्तराणि सन्ति। स्वस्व योगं सम्प्राप्य "पुरुषत्वं प्रपेदिरे" इत्यनुसारेण पुरुषरूपेण तेषामस्ति व्यवहारः। ब्रह्मणो भोग्याशक्तिर्गायत्री सावित्री वा कथिता, सरस्वत्या योगस्तु ब्रह्मणा सह कन्यारूपेऽस्ति। सरस्वती ब्रह्मणो भोग्या शक्तिर्नास्ति, ज्ञानशक्तिस्तु शिवस्य भोग्या विद्यते। अत एव सरस्वत्या भोग्यबुद्ध्या कामनाकरणात् शिवद्वारा ब्रह्मणः शिरश्छेदो वर्णितः। शिवत्वप्राप्तिं विना विद्याशक्तेर्भोगः शिरश्छेदसम एवास्ति। यतो हि पशुभावे विद्याया उपभोगोऽन्धतमस्येव पातयति। शिवेन सह लक्ष्म्या योगो रक्षात्मकेन भावेन तथैश्वर्येण सह भगिनीरूपेण वेदेन बोधितः—

एष ते रुद्र भागः सहस्वस्राऽम्बिकया तं
जुषस्व स्वाहैष ते रुद्रभाग आखुस्ते पशुः।

[यजुः० ३-५९]

अर्थात्—हे रुद्र! अयं तव भागः, भवद्भगिन्याम्बिकया सह गृहाण। अयं ते भागः आखुर्मूषको वा तव पशुरस्ति। योगेनानेन शरत्कालापत्तीनां शान्त्यर्थं विधानं कृतम्। परं भाष्यकारैरत्र क्रूरस्य देवस्य योगो व्याख्यातः, तत्तु वस्तुतो न सम्यक् प्रतिभाति, अथवा सङ्गतिरेवं कर्तुं शक्यते यदलक्ष्म्या विनाशे लक्ष्म्याः क्रूरत्वा-

भिप्रायो भाष्यकाराणां विद्यते। शतपथश्रुतिरपि—"अम्बिका हवै नामास्य स्वसा" इति वदति। 'स्वसा' इत्यस्यार्थो वस्तुतो भगिनीत्येवाऽस्ति। इयं शक्तिः रुद्रस्य भोग्या नाऽस्ति। इदमपि प्रसिद्धमस्ति यच्छिवमूर्तिरशिवरूपे स्थिताऽपि समस्तैश्वर्यस्य प्रदात्री विद्यते—

अमङ्गल्यं शीलं तव भवतु नामैवमखिलं।
तथापि स्मर्तृणां वरद परमं मङ्गलमसि॥

अर्थात्—हे वरद! तव सर्वोऽपि व्यवहारोऽमाङ्गलिकोऽस्ति परं स्मरणकर्तृणां कृते त्वं परममङ्गलस्वरूपोऽसि। लक्ष्म्या योगाऽभावे तदेतन्न सम्भवति। "आखुस्ते पशुः" मन्त्रस्यानेनांशेन ज्ञायते यद् गणेशमूर्तेरपि कल्पनानेनैव योगेन कृता, या विघ्नानां नाशयित्री सर्वेषां चैश्वर्याणां प्रदात्री मूषकवाहनवती चास्ति। पार्वत्या शिवस्य च गणेशो भोग्यपुत्रो नाऽस्ति। उमया स्वीयाङ्गस्य मलिनांशेन तस्य निर्माणं कृतम्। उमापेक्षयैश्वर्यस्य तत्र न्यूनताबोधनमुचितमेवाऽस्ति, यतोहि ब्रह्मविद्यैव सर्वासु विद्यासु श्रेष्ठाऽस्ति। शिवेन वैपरीत्यभावेऽस्यापि शिरश्छेदो वर्णितः, लक्ष्म्याऽत्यन्तं प्रियस्य हस्तिनो मस्तकप्रदानेन पुनर्जीवितः। लक्ष्म्या ध्याने हस्तिनो योगो वर्णितः—

कान्त्या काञ्चनसन्निभां हिमकरप्रख्यैश्चतुर्भिर्गजै-
र्हस्तोत्क्षिप्तहिरण्मयाऽमृतघटैरासिच्यमानां श्रियम्।

गणेशपूजनं माङ्गलिकरूपेण प्रत्येकस्मिन्नपि वैदिकगृहे सर्वप्रथमतयानेनैवाऽभिप्रायेण सम्पाद्यते। शिवपार्वत्योर्योगे पार्वत्याः श्रेष्ठताऽस्ति, लक्ष्म्यास्तत्र गौणता भवति। अत एव लक्ष्म्यारूपान्तरीभूतसीताद्वारा गोस्वामिना तुलसीदासेन गिरिजायाः पूजनं लिखितम्। शिवेन लक्ष्म्या अपि योगोऽस्ति, लक्ष्म्या विष्णुना

सह विद्यते नित्ययोगः, या हि शान्तिज्ञानादिभिः शुभगुणैः स्वीयं रूपं प्रकाशयति। षट्कर्मदीपिकाग्रन्थे शान्तिकर्मणां कृते वैष्णव-मन्त्राणामुपयोगः कृतः। एतेन ज्ञायते यदुपर्युक्ते वैदिके मन्त्रे रुद्रेण सह लक्ष्म्या एव योगोऽस्ति। अतएव शान्तिकर्मण्यस्य विनियोगः कृतः। शिवस्य लक्ष्मी भोग्या नास्तीति शिवो वैष्णवः कथ्यते। ब्रह्मवत् शिवे कदापि वैपरीत्यं न जातम्, यतो हि तेनोमया योगो विद्यते। उमाया एव द्वितीयं रूपं कालीशक्तिरस्ति, येन रुद्रः संहारं करोति। तस्या विष्णुना सह भगिनीयोगो भवति, यस्या अवतारो नन्दगृहे यशोदागर्भाज्जातः। भागवतपुराणे कृष्णाऽनुजारूपेण या प्रसिद्धाऽस्ति। अनयैव विष्णुरसुराणां संहारं करोति।

कालोऽस्मि लोकक्षयकृत् प्रवृद्धः।

अनेन गीतावचनेन विष्णोः कालभावः समर्थितो भवति। शिवस्य विष्णौ विष्णोश्चशिवे वैपरीत्याऽभावादेव द्वयोरभेदो द्वयोर्मूर्ती चोपास्ये मन्येते। यदा सती रामचन्द्रस्य परीक्षार्थं गता तदा सीतारूपे सतीं दृष्ट्वापि रामचन्द्रे वैपरीत्यं न जातम्, प्रत्युत तां प्रत्यभिज्ञाय जगज्जननीरूप एव तां प्रणतवान्। अत एव श्रीराम-मपि परमशिवभक्ताः शैवं मन्वते। देवीभागवते सरस्वत्या योगोऽपि विष्णुना सह वर्णितः यो हि सरस्वत्या लक्ष्म्याश्च विरोधप्रकटने लिखितः, अनेनैव योगेन विष्णुर्मुमुक्षुभ्यो ज्ञानं दत्त्वा मुक्तिं ददाति।

ददामि बुद्धियोगं तं येन मामुपयान्ति ते।

इति गीतावचनेनाप्यस्य सङ्गतिर्जायते। शिवस्याप्युमया सह ब्रह्मविद्यायोगः, काल्या सह संहारप्रवृत्तियोगः, षोडश्यासहानन्द-योगेन पूर्णब्रह्मत्वं मन्यते। कल्पभेदेन शिवादपि विष्णोरिवोत्पत्ति-स्थितिसंहाराणां त्रयाणामपि भावानामुपासनायाः श्रेष्ठत्वाभि-प्रायेण पुराणेषु वर्णनं कृतम्।

१०. पुराणेष्वेतासां शक्तीनां पुरुषभावेन योगे च यदा तदा विरोधभावोऽपि प्रदर्शितः, यो हि वस्तुतो नाऽस्ति। सम्भावनायामिदं लिखितम्, शक्तितत्त्वस्य महत्त्वप्रदर्शनाऽभिप्रायेण वा तदस्ति। अन्यथा योगभङ्गे जाते पालनसृष्टिसंहारास्त्रयोऽपि ये भावाः सृष्टेर्हेतुभूताः सन्ति, ये त्रिविधैरेभिर्योगैरेव चलन्ति, ते नष्टा भविष्यन्ति, तथा किमपि कार्यं सिद्धं न स्यात्—यथा हयग्रीवरूपधारणे लक्ष्म्या विष्णुं प्रति शापप्रदानम्, सावित्र्या मुख्यस्थानप्रदानाय ब्रह्माणं प्रति गायत्र्या, धात्री वृक्षत्वप्राप्तये शापप्रदानम् [कार्तिकमाहात्म्ये] श्रीरामचन्द्रस्य परीक्षाऽनन्तरं शिवद्वारा सतीत्यागस्तथा सत्या पररूपं धारयित्वा शिवस्य पराभवकरणम्, शिवपुराणे महाभागवते च कथितम्। एताः सर्वाः कथाः शक्तेर्महत्त्वख्यापनार्थमेव सन्ति। अद्भुतरामायणे सीताया महाकालीरूपधारणमप्यद्भुतमेव, श्रीरामस्य परीक्षार्थं सत्या सीतारूपधारणमपि तथैवाऽस्ति। सतीद्वारा वैपरीत्ये समुपस्थापिते शिवसतीयोगो भग्नः सत्यास्त्यागश्च शिवेन कृतः, परं सतीं विना शिवः स्वकार्यकरणे समर्थो नाऽभवत्, देवप्रार्थनानुसारं पुनरुमायोगं सम्प्राप्य शिवो हृष्टो जातः। यावदुमाया योगो शिवेन न प्राप्यते तावच्छिवः शवरूपो भवति, स्वकार्यकरणे च सर्वथाऽक्षमस्तिष्ठति। अत एव ताराकालीरूपेषु शवरूपेण शिवस्य मूर्तिर्निर्मीयते। परं सती या ब्रह्मविद्याऽस्ति तदुपर्यपि-भ्रमस्याज्ञानस्यावरणमायाति, येन सा राममविज्ञाय भ्रमे निपतति। कथेयं केनोपनिषदि कथिताया हेमवत्युमायाः सिद्धान्तेन विपरीता जायते, यतोहि सतीति पतिव्रताया नाम भवति। एवमेव ब्रह्मविद्या नियमेन परब्रह्मणः पृथङ् न भवति, पुनरप्येतादृशकथालेखनेन स्पष्टं विरोधो विज्ञायते, यतो हि ज्ञानस्याज्ञानस्य च परस्परं विरोधो भवति, भ्रमोत्पत्तिरज्ञानादेव जायते। तदेतत्कथनं श्रीरामस्य शिवस्य चागाधप्रेमप्रकाशनायैव प्रतीयते, पुराणकारेण

तथा लिखितमस्ति, तथापि वस्तुतस्तथा नाऽस्ति। एतदपि संभावयितुमेव शक्यते। तादृश एव भावो हयग्रीवरूपे लक्ष्मीनारायणयोर्योगेऽपि ज्ञातव्यः।

११. ब्रह्मणः शक्तेश्च वास्तविकं किमपि रूपं नाऽस्ति। तथापि मन्त्रैर्ज्ञानशक्त्या च विभिन्नार्थानां प्रकटनाय साधकस्य भावनानुसारेण पुरुषरूपे स्त्रीरूपे वा यद्वा कस्मिन्नप्यभीष्टे स्वरूपे परमं तत्त्वं शक्तिविशिष्टरूपेण प्रकटं भवति। अनेकेषां जनानामत्रविषये कथनमस्ति यन्मनुष्यस्यैव भावना केवलं प्रकटी भवति, परमात्मनो व्यक्तिर्न भवति। तथापि तादृशी वार्ता नाऽस्ति—यथा कुम्भकारः साधनेन भावनामात्रेण च पात्राणां निर्माणं न करोति, भावप्रकटनाय स मृत्तिकारूपमाधारमपेक्षते। तस्य भावनानुसारेण घटादिवस्तूनि मृत्तिकया विना न निर्मीयन्ते, तथैव साधनाविषयेऽप्यस्ति। मन्त्रेण चिन्तनेन च या मूर्तिर्निर्मीयते सा सच्चिदानन्दात्मिकैवाऽस्ति, सा मूर्तिः केवलं कल्पनामात्रं न भवति। यया मूर्त्या दयाश्रद्धाबुद्धिकीर्तिश्रीप्रभृतीनां स्त्रीभावात्मकशुभगुणानां व्यक्तिर्भवति सा स्त्रीरूपे समुपास्यते। धर्मबलज्ञानपराक्रममोक्षादि पुरुषभावसूचकतत्त्वानां ध्यानं पुरुषसूचकमूर्तिभिः सम्पाद्यते। तथैव तेषां वाहनविषयेऽप्यस्ति। गरुडः धर्मस्य सर्वैस्त्वरितां गतिं बोधयति, अस्य योगो विष्णुना विद्यते। "धर्मस्य त्वरिता गतिः", एतेन विष्णुः शीघ्रमेव भक्तानां दुःखनिवारणं करोति, पालनकार्येषु च तस्यात्यन्तं तीव्रता तिष्ठति। अयमेवधर्मः शिवेन योगे वृषस्य रूपं धारयति—

"धर्मो वै चतुष्पाद् वृषः।"

एतेन पालनस्य भावो गृहीतः। शक्तिक्रमेऽयमेव सिंहस्वरूपं धारयित्वा महाबली संजातः—

"दक्षिणे पुरतः सिंहं समग्रं धर्ममीश्वरम् ।"

भैरवेण सहायमेव श्वानरूपेण संतोषस्वामिभक्तिजागृत्यादि-शुभगुणान् व्यनक्ति । गणेशेन सहायं मूषकरूपे विघ्नानां कर्तनकार्यं करोति । हनुमत्तत्त्वाद् वानररूपे स्वामिभक्तिस्तीव्रता स्वकार्य-सम्पादनप्रवणतेत्यादि भावाः गृहीताः । एवं रूपेणोपासनामार्गे तदिदं तत्त्वं निश्चितमस्ति । बुद्धिमद्भिरत्र विशेषेण ध्यानं देयम् । एतेषां भावानां चिन्तनेन साधके विभिन्ना गुणाः प्रकटीभवन्ति, येऽनेकविधैश्वर्यसमर्पकाः सन्ति तथा त्यागद्वारा परमपुरुषार्थस्य-प्राप्तिरेभिः सञ्जायते ।

॥ इति तृतीयः खण्डः ॥

४. ज्ञानयोगरत्नमणिग्रन्थनम्

उपासना मानसिक्याः क्रियाया नामधेयमस्ति। एतद्द्वारा मनः पवित्रं भवति, तदनन्तरं विवेकशक्तेर्विकासे जाते साधकस्तत्त्वज्ञानस्याधिकारी भवति। उपासनाया अनन्तरं तत्त्वज्ञानस्य विचारस्य वा प्रसङ्गः समायाति। अत एवाऽधुना तत्त्वज्ञानस्य क्रमो लिख्यते। क्रमेऽस्मिन् सन्त्यनेके मतभेदाः, तथापि स्वानुभवो यथा विद्यते तथा शास्त्राणां निष्पक्षं रूपं यथा विज्ञातमस्ति तदेवात्र गृहीतम्। मतभेदाऽस्तित्वमस्मिन् विषयेऽनिवार्यमस्ति, तथापि तत्र ध्यानं न दत्त्वा विचारकैर्मनोयोगेनास्य मननं विधेयम्। इयं विचारशैली पाठकानामवश्यं मनोरञ्जनकर्त्री सिद्धा भवष्यतीति पूर्णाशाऽस्ति।

१. जगत उत्पत्तिः स्थितिर्लयश्चैताँस्त्रीनपि भावान् परब्रह्मणः पराशक्तिरेव विदधाति। पराशक्तिः सच्चिदानन्दस्वरूपिणी विद्यते, तस्या इच्छयोत्पत्तिस्थितिलयानां शक्तयः स्व स्व व्यवहारं कुर्वन्ति। एतास्तिस्रः शक्तयस्तथेच्छाशक्तिः परायाश्शक्तेरेव प्रकटी भवन्ति। इच्छाशक्तिः शिवसूत्रे "इच्छाशक्तिरुमाकुमारी" कथिता। इच्छाशक्तिरेव 'will' इति कथ्यते। सत्शक्तिश्चिच्छक्तिरानन्दशक्तिरेव विविधरूपेषु कार्याणि करोति। आनन्दशक्तिरेव मुमुक्षुभक्तान् ज्ञानिनः पुरुषांश्चाङ्गीकरोति। सैवोपासनामार्गे राधासीताललिताषोडशीति नामभिः कथ्यते। जगतिबुद्धिगम्यं यत्किञ्चिद् वस्तु समायाति तत् सर्वं शक्तिरूपात्मकमेवाऽस्ति। शक्तेर्भिन्नमशक्तमसन्मिथ्यानिरर्थकं चाऽस्ति तस्याः समस्तरूपाणां निर्णयोऽवश्यं पुरुषबुद्धिद्वाराऽसंभवोऽस्ति।

अतएवोक्तम्—

यस्याः प्रभावमतुलं भगवाननन्तो
ब्रह्मा हरिश्च नहि वक्तुमलं बलं च ॥

अस्याः पराशक्तेरतुलं प्रभावं ब्रह्मविष्णुमहेशा अपि न वक्तुं शक्नुवन्ति यतोह्येते सगुणा देवास्तु तदधीना एव सन्ति। अनन्त-कल्याणगुणात्मकं शक्त्या ध्येयरूपं विद्यते। अस्यामवस्थायां शक्ति-शक्तिमतोर्भेदो नाऽस्ति। यान् वयं लोके स्त्रीपुरुषान् वदामस्तानि सर्वाणि शक्तेरेव रूपान्तराणि सन्ति। शक्तिवादिनामाचार्याणां निर्णयोऽस्मिन्विषये ईदृशोऽस्ति यत् यं शैवाः "शिव" इति, वैष्णवा "विष्णु" रिति, वेदान्तिनो "ब्रह्मे"ति वदन्ति तत्पराशक्तेः प्रेरकम-धिष्ठानात्मकं रूपान्तरमस्ति। अत एवैषां सर्वेषां मतानामैक्ये सिद्धेऽ-भेदः सिद्धो भवति।

२. सत् शक्तिः समस्तशक्तीनामधिष्ठानमस्ति, सैवाधारशक्ति-रुच्यते, या समस्तं जगत् स्थिरं कुरुते। यान्यपि नियमितानि व्यवस्थात्मकानि कार्याणि भवन्ति तेषां सर्वेषां व्यवहारयोग्यताऽन-यैव प्राप्यते। अस्यामेवाश्रिताऽविद्याशक्तिरप्यस्ति या स्थूलमिदं जगत् पाञ्चभौतिकं रूपं ददाति। इयमेव स्थूलसूक्ष्मकारणशरीर-द्वारा तथाऽकाशवाय्वग्निजलपृथ्वीति पञ्चभूतानि विरच्य समष्टि-व्यष्टिरूपं दृश्यमानं प्रपञ्चं रचयित्वा सर्वशक्तिभ्यः स्वस्वकार्यक्षेत्राणि निर्माति। सच्छक्त्यैव ज्ञानशक्तिरानन्दशक्तिश्चापि स्वात्मानं प्रकटयतः। अत एवेयमेव आधारबलरूपिणी योगमाया काली स्थिर-माया वा कथ्यते। अस्यैव तत्त्वस्य साक्षात्कारः साधकाय प्रथम-तयाऽपेक्षितोऽस्ति। एतां विनाग्रे क्रमस्योद्घाटनं न भवितुमर्हति। एतदन्तरे भासितं तत्त्वं "काल" इत्युच्यते। अत एव स्थूलजगतः सर्वाणि वस्तूनि कालाधीनानि सन्ति। मृत्युरप्यस्यैव रूपान्तर-मस्ति या नियमनाद् 'यम' इत्युच्यते। चिच्छक्त्या सह ज्ञानात्म-

कानि शास्त्राणि तथा सामान्यरूपेण सर्वमपि जगत् व्यवहारात्मक-रूपेण प्रकाशयति। अस्या अविद्याशक्तेश्च विद्यते विरोधः। अनयैव ब्रह्म व्यक्तं सन्नाना लीलाः सम्पादयति। अवतारा अप्यनयैव शक्त्या भवन्ति। जीवोऽपि चैतन्यशक्त्या एव रूपान्तरमस्ति यो ह्यविद्याशक्त्याधारेण व्यक्तो भवति। अयमस्त्यानन्दशक्त्या अभिलाषी परमविद्यायाः स्थूलताऽनन्दस्य सूक्ष्मं रूपं स्वाभ्यन्तराद् व्यक्ति न ददाति। अतो विषयैर्यत् सुखमानन्दो वा प्राप्यते तस्मिन्नेवायं संलग्नस्तिष्ठति, यमविद्यया मिश्रिते रूपे सत्त्वादशुद्ध रूपे गृह्णन् जीवो, बन्धने, क्लेशे, जन्मनि, मरणे, नरके, स्वर्गे नानोत्कृष्ट-निकृष्ट-योनिषु भ्रमति तथाप्ययमानन्दस्य यथार्थां मूर्तिं न लभते। एतस्य सर्वस्य कारणमविद्याया आवरणशक्तिरस्ति ययाऽनन्दस्तिरोहितः। अविद्याया दूरयित्री ज्ञानशक्तिर्विद्या वाऽस्ति, अनयैवाऽविद्याया निवृत्तिः परमानन्दस्य प्राप्तिश्च भवति। यथा रज्जौ कल्पितः सर्पः, स्वप्नदृष्टाः पदार्था वा, रज्जुज्ञानेन जागृदवस्थाया विवेकेन वा निवर्तन्ते तथैवाऽविद्याशक्तिर्विद्यया निवर्तते, अद्वैतवेदान्तिभिरेभिर्दृष्टान्तैर्विषयोऽयं कथितः। ब्रह्मण्येषां विरोधियुग्मानां स्थितिर्नाऽस्ति। विद्याऽविद्याभ्यां ब्रह्मणो रूपात् स्वलाभायाऽधारो मिलति। एवं जीवोऽज्ञानान्मुक्तो भवति यथार्थस्यानन्दस्य च पात्रं भवति। ब्रह्मणो जीवस्य च स्वरूपतो भेदो नास्ति।

३. यदा ज्ञानस्य शुद्धावस्थया जीवस्य परिचया भवति, तदा समस्ता वासनाः कर्मसमुदायश्च भस्मो भवन्ति।

ज्ञानाऽग्निः सर्वकर्माणि भस्मसात् कुरुतेऽर्जुन।

भो, अर्जुन, ज्ञानरूपोऽग्निः समस्तकर्माणि दहति। अज्ञानात्मक ज्ञानबोधानन्तरं शुद्धज्ञानप्राप्तौ सत्यां जीवः कृतकृत्य आनन्दितश्च सञ्जायते—इत्यादिभिः संकेतैर्व्यवहारः क्रियते। अज्ञातप्रवृत्तिरेव द्वैतस्य प्रतिपादिकाऽस्ति—

द्वासुपार्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते।
तयोरन्यः पिप्पलं स्वाद्वत्ति ह्यनश्नन्नन्योऽभिचाकशीति॥

अर्थात् संसाररूपे वृक्षे द्वौ पक्षिणौ स्थितौ स्तः, एकोऽस्य स्वादु-फलानि भुनक्ति, द्वितीयश्च साक्षिरूपेणैनं पश्यति। द्वावपि पक्षिणौ परस्परं मिलितौ मित्रभावेनाऽस्मिन् संसारे स्वस्वव्यवहारं परि-चालयतः। अनया कल्पनया जीवेश्वरसंसाराणां बोधो गृहीतः। इदमेव द्वैतमुच्यते। द्वैतमिदं स्थूलसूक्ष्मभेदेन द्विप्रकारकमस्ति। स्थूल-द्वैतस्य निवृत्तिर्विद्यया भवति, सूक्ष्मं द्वैतमानन्दशक्तावस्ति, अविद्या-विरहाच्च तच्छुद्धमस्ति।

४. अविद्याशक्त्या मुक्तत्वे जीव आनन्दशक्त्या परिसरे निर्बा-धावस्थां सम्प्राप्यानन्दशक्तेर्दिव्यलीलानां पात्रम्भवति। वस्तुतः क्रीडेयं नित्याऽस्ति, केवलं भगवद्योगैकलभ्याऽस्ति। अत्रत्या मूर्तय आनन्दात्मिकाः सन्ति। श्रीकृष्णः, श्रीरामः, श्रीसदाशिवः, श्रीपरा-शक्तिप्रभृतय उपास्यदेवा अस्यैव भावस्य मूलरूपेणाभिव्यञ्जकाः कथ्यन्ते। दिव्यलीलेयं शुद्धानन्दमयी विद्यते। आनन्दस्याभि-व्यञ्जिका श्रीराधा, श्रीषोडशीति शक्तिद्वयमपि वैष्णवे शाम्भवे च क्रमे स्वीक्रियेते। अत एव स्वरूपाशक्तिः, ह्लादिनीशक्तिश्चापि कथ्येते। एतयोर्लीला श्रीमद्भागवतादिपुराणेषु तथा कतिपयतन्त्र-ग्रन्थेषु दिव्यलीलारूपेण कथिताः सन्ति। जीवोऽविद्यया मुक्तः सन्नान्दात्मकं विग्रहं सम्प्राप्य लीलाक्षेत्रेऽस्मिन् स्वच्छन्दतया विच-रति, तथाप्यधिकारभावाद्दूर एव तिष्ठति, अर्थात् स्वयं ब्रह्म न भवति। येन ज्ञानात्मकोपाधिना लीलायामस्यां प्रविशति स चैतन्या-नन्दस्यानुभावकं रूपं पृथक् स्थिरयति, अतो द्वैतं तिष्ठति। द्वैतस्या-स्याज्ञानात्मकत्वाऽभावात् क्लेशादिजनकद्वैततोऽस्य वैलक्षण्यं विद्यते, स्वरूपात्मकत्वादिदमेवाऽद्वैतमपि कथ्यते। यथैकयैव शर्करया विभिन्नानि क्रीड़नकानि निर्मीयेरन्, तेषु विभिन्नान्यश्वहस्त्यादि

नामानि तथा विभिन्ना आकृतयो भवन्ति, तथापि स्वादे भेदो न भवति, तादृशमद्वैतं तत्र विद्यते। इयं व्यक्तिर्जलतरङ्गवत् मृद्-घटवद्वाऽविरुद्धाऽस्ति, उपासकानामाचार्याणामीदृश एव निश्चयो-ऽस्ति। मायावादस्याद्वैतसिद्धान्तेऽविद्यानिवृत्त्यनन्तरं स्वात्मानुभवे जातेऽन्या काऽपि चर्चैव न जायते, यतोहि तदनन्तरघटितमस्मिन्-भौतिके संसारे कथमपि प्रकटयितुं न शक्यते।

"यतो वाचो निवर्तन्ते अप्राप्य मनसा सह।"

श्रुतिरियं तामेवावस्थां व्यञ्जयति। न किमपि साधनमेवाव-शिष्यते, येन कथनीयं स्यात्, केवलं बाधिताऽनुवृत्त्या लौकिका व्यवहारा जीवन्मुक्तस्य भवन्ति, तथाऽपि ते आभासमात्रभूता भवन्ति। शरीरनिर्वाहमात्रातिरिक्तं तेषामन्यः कोऽप्युपयोगो नाऽस्ति एत एव प्रारब्धा उच्यन्ते। पुराणेष्वानन्दोल्लासस्यैतादृशं यद्वर्णन-मुपलभ्यते तच्छाखाचन्द्रन्यायेनैवाऽस्ति। एतद्वर्णनं सङ्केतमात्रमेव ज्ञेयमित्यादि वार्ताः कथ्यन्ते। लीलेयं कदापि स्थगिताऽपि-भविष्यतीत्येषाऽपि कल्पना न सम्भवति, यतो हि श्रमजन्यः क्लेश-स्तत्र नाऽस्ति। यत्र श्रमजन्यः क्लेशो भवति तत्रोपरतिर्जायते। अतएवोपासकानां सविधे स्थगितत्त्वस्य विचार एव न जायते। अधुनातनैः सद्भक्तैरयं भावः पदेषु, भजनेषु, वाणीषु च शोभन-रीत्या कथितः। यद्यप्यद्वैतवादिभिराचार्यैरेतस्य वर्णनं न कृतम्, तथाप्युपासकानां तादृशलीलावार्तानां तिरस्कारोऽपि न कृतः। श्रीस्वामिशङ्कराचार्याणां भक्तिप्रतिपादकस्तोत्रैरेतस्य समर्थनं भवति, सौन्दर्यलहरीषट्पदीप्रभृतिस्तोत्राणि तत्र प्रमाणानि सन्ति। प्राचीनसाधकाचार्याणामिदमपि गुप्तं मतमासीद्यदिमं सिद्धान्तम-प्रकटतया तथा ज्ञानं प्रकटतया कथनीयम्। प्रतीयते यदनेनैव हेतु-नाऽऽचार्येण तदिदं गुप्ततया ज्ञानं च प्रकटतया कथितम्, यतो हि

पूर्णाधिकारिणो जितेन्द्रिया आप्तकामाः पुरुषा एवाऽस्य वर्णनेऽधिकारिणो भवन्ति, अन्यथाऽनेन हानिरपि सम्भवति।

५. शक्तेरनुभवाऽनुकूलं स्वरूपद्वयं मन्यते-एकं कार्यम्; द्वितीयं कारणम्। दिव्यलीला आनन्दशक्तेः कार्याणि सन्ति, एवमेव सच्चित् शक्त्योरपि विषयेऽस्ति। कारणरूपे यदैतासामवस्थानं भवति तदानीं तदेव ब्रह्म उच्यते यतोहि पराशक्तिर्ब्रह्म चैकमेवाऽस्ति। सैवाऽवस्था निराकारा मनोवागगोचरा च कथिता। आनन्दशक्त्या उद्रेकेण-लीलाभावो व्यक्तो भवति। उद्रेकः कार्यात्मको भवति, अत एव निराकाराऽवस्थायां लीला नास्ति। कार्यकारणयोरभेदसत्त्वादस्य सर्वथाऽभावोऽपि नाऽस्ति। कार्यकारणयोर्भेद आविर्भावादस्ति, विषयेऽस्मिन् भगवत इच्छैव मुख्याऽस्ति, यतोह्याविर्भावतिरोभावौ तस्येच्छयैव भवतः। लीलाकरणं तस्या उपरामश्च भगवत इच्छाया उपर्येवायत्ते स्तः। विषयेऽस्मिन् वेदान्तिनां कथनमस्ति यद् ब्रह्मणः कीदृशोऽपि परिणामो न जायते, परिणामोऽविद्याया मायाया वा भवति—यथा रज्जौ सर्पस्य परिणामः। रज्ज्वाश्रित-तत्त्वेन स्थिताया अविद्यायाः परिणामः सर्पो भवति, रज्जुस्तु विकाररूपेण परिणामेन सर्वथा रहिताऽस्ति, यतोह्यवस्थान्तर-प्राप्तिरेव परिणामः कथ्यते, सा तु रज्जौ नास्ति। उपनिषदि सुवर्ण-मृत्तिकादीनां ये दृष्टान्ता दत्तास्ते केवलं ब्रह्म उपादानकारणं निमित्तकारणं चाप्यस्तीति बोधनाभिप्रायेणैव सन्ति, ब्रह्मणः परि-णामभूतं जगदिति बोधनाय ते न सन्ति, यतो हि चेतनस्वरूपस्य ब्रह्मणः परिणामे कोऽपि दृष्टान्तो नाऽस्ति। विषयेऽस्मिन्नेवमुच्यते यत् रज्जुसर्पकल्पनायां दोषो हेतुरस्ति, अत इमे मायिकाः परि-णामाः सन्ति, परन्तु ब्रह्मणो लीलात्मके परिणामे दोषो हेतुर्नास्ति, अत एव लीलारूपोऽविकृतः परिणामो भवितुमर्हति, रज्जुसर्पादयो दृष्टान्ताश्चावैदिकाः सन्ति। "प्रवर्तनालक्षणा दोषाः" इति न्याय-

सूत्रेण ज्ञायते यत् प्रवृत्तौ दोष एव हेतुरस्ति, तथाप्यानन्दादीनां परिणामा भवन्तीत्यत्र किमपि प्रमाणं नाऽस्ति। "आनन्दादयः प्रधानस्य" इति व्याससूत्रेऽविकृतरूपेणैवानन्दादयः कथिताः, तस्य परिणामबोधनं न सम्यक् प्रतिभाति। रज्जुसर्पदृष्टान्तोऽपि वैदिको भवेदिति कथनं समीचीनं नाऽस्ति, यतो हि दृष्टान्ते शास्त्रापेक्षा न भवति। वादिप्रतिवादिनोरभिमतत्त्वे एव दृष्टान्तस्याभिप्रायो भवति। विषयेऽस्मिन् शास्त्रं निरपेक्षं भवति, तथापि स्वप्नदृष्टान्तो बृहदारण्यकोपनिषदि दत्तः। "सन्ध्ये सृष्टिराहहि" इति व्याससूत्रे तदेतत्कथितम्। प्रातिभासिकत्वे रज्जुसर्पस्वप्नस्तुल्यताऽस्ति। अतो मायायाः परिणामः ब्रह्मणो विवर्तश्चैव जगद् विद्यते। ब्रह्मणोऽविकृतपरिणामत्वस्य समर्थनं "तदात्मानं स्वयमकुरुत" इत्यादिभिः प्रमाणैर्जातम्, तथाऽप्येतस्मिन् विषये दृष्टान्ताऽपिद्धिरस्ति।

६. सत्, ज्ञानम्, आनन्द इति त्रिस्वरूपयुक्तशक्तीनां स्वोयं स्वीयं स्वतन्त्रं क्षेत्रमस्ति। एतास्तेषु स्वं स्वं कार्यं कुर्वन्ति। एतासु परस्परं सहयोगोऽस्ति। एतासां मिलनं विना किमपि कार्यं न भवितुमर्हति। कार्यकाले एकस्याः प्राधान्यमपरयोर्गौणत्वं भवति। आनन्दक्षेत्रे सच्चज्ञानञ्च गौणे भवतः, तद्वत् सत् क्षेत्रे आनन्दो ज्ञानञ्च गौणे भवतः, ज्ञानक्षेत्रे च सद् आनन्दश्च गौणौ भवतः। वेदान्तग्रन्थेषु माया मिथ्या कथिताऽस्ति। तत्कथनमविद्यायाविषये विद्यते, सच्चिदानन्दस्वरूपिण्याः शक्तेर्विषये तु तन्नास्ति, यतो हि सा निर्बाधाऽस्ति।

७. यदा शक्तिरूपेण ब्रह्मणोऽवस्थानं भवति तदा तत् सगुणं ब्रह्म उच्यते, तदैव तस्य स्पष्टाऽभिव्यक्तिरस्मिन्स्थूले जायते। तद् सद्रूपेण जडरूपे कर्मयोगे च प्रतिपादितं भवति, चिद्रूपेण चेतनजीवरूपे तथा ज्ञानयोगस्य प्रतिपादकं भवति, आनन्दरूपेण दिव्यभोगवतां लोकानामुपासनाया भक्तिमार्गस्य च विस्तारं करोति।

तिसृणामप्येतासामवस्थानां निरूपणं भक्तिमार्गस्याचार्यास्तथा वेदान्तिन आचार्या अपि प्रतिपादयन्ति। वेदान्ते पञ्चदशीग्रन्थस्य पञ्चदशप्रकरणानि पञ्चपञ्चप्रकरणक्रमेण सत्-चिदानन्दस्यैव प्रतिपादने पर्यवसितानि। भेदस्त्वयानेव यद्भक्तिमार्गिण एतस्य सूक्ष्माकारं स्वीकुर्वन्ति वेदान्तिनः सच्चिदानन्दमाकृतिरहितं मन्वते।

८. कर्मज्ञानभक्तिसाधनैरधिकार्यनुसारेण गौणप्रधानभावेन ब्रह्मैव प्राप्यमस्ति। अत एव सिद्धान्त एषां विरोधो नास्ति। त्रयाणामपि साधनानामनुयायिनः शुद्धतयैतेषामाचरणेनैकमेवोद्देश्यं प्राप्नुवन्ति। एतदभिप्रायानुसारेणैव श्रीमद्भगवद्गीताया उपदेशोऽपि विद्यते। साम्प्रदायिका आचार्या एकैकाधिकारिणामपेक्षयोपदेशं दत्तवन्तः। समन्वयदृष्ट्या तेषां सङ्गतिर्भवितुं शक्नोति। स्वस्माद् भिन्नमतानां खण्डनं तत्तद्विशेषाऽधिकारिणां श्रद्धाया वर्धनार्थमेवाऽस्ति, वस्तुतस्तन्नाऽस्ति, एवमार्यधर्मस्य विरोधो दूरीकर्तुं शक्योऽस्ति। इयमेव व्यवस्था द्वैतस्याद्वैतस्य चाऽपि विषये भवति, किं बहुना संसारस्य सर्वेषामपि मतानां सत्यांश एकत्वमस्ति, देशकालयोरवस्थायाञ्च भवति भेदः।

९. नित्यचेतनरूपोऽपि जीवोऽविद्याभावेन मृत्युपाशे निपतितो भूत्वा स्वस्य कृते सुखं दुःखं जन्ममरणं च मनुते। वस्तुत इमे धर्मा व्यष्ट्यविद्यायाः सन्ति, तथापि जीवः स्वस्मिन्नेतान् मनुते। "अहं ब्रह्मोऽस्मि", 'तत्त्वमसि', एतेषां वाक्यानामुपदेशेन शुद्धचेतनस्वरूपस्य साक्षिण आत्मनो ज्ञानं यदा स प्राप्नोति तदा तस्याऽविद्या निवर्तते। एतस्य कार्यस्य सिद्धिर्योगेनोपासनया वा न सम्भवति। योगेनोपासनया च हृदयशुद्ध्यनन्तरं ज्ञानप्राप्तेर्योग्यता प्राप्यते, यतो हि यो यदाश्रितः स तस्य निवर्तको न भवति, यथा चन्द्रमाः रात्र्यधीनस्तिष्ठति, स रात्रेर्विनाशं कर्तुं न शक्नोति। रात्रेर्विनाशं तु सूर्य एव कर्तुं शक्नोति। तथैव कर्म चोपासना

चाविद्याया विनाशके न भवतः, केवलं मलविक्षेपदोषनिवर्तके भवतः। आवरणं त्वभेदज्ञानादेव निवर्तते। अत एवोक्तम्—"ऋते ज्ञानान्न मुक्तिः" अर्थात् ज्ञानं विना मुक्तिर्नसम्भवति।

१०. यथाग्नेः दहिप्रकाशोभयगुणाभिव्यक्तिः काष्ठ एव जायते, जले केवलं दाहाभिव्यक्तेरेवावकाशः प्राप्यते, न प्रकाशाभिव्यक्तेः, तथैवानन्दांशाभिव्यक्तिर्जीवे न भवति, अविद्याया मलिनसत्त्वांशः तत्कार्याणि चात्र कारणानि सन्ति। अविद्यामायाया अंशद्वयमस्ति एका समष्टिः (Universal) द्वितीया च व्यष्टिः (Individual) ययोश्च 'कुल' इति 'जुज' इति नामान्तरम्भवति। मलिन शक्तियुक्तायामविद्यायां प्रकटिता शक्तिर्जीव इति, समष्टौ च चैतन्यशक्तेर्व्यक्तिरीश्वर इति कथ्यते। यथा ईश्वर एको भवति, तथैव जीवोऽप्येक एवाऽस्ति, तथाऽप्युपाधीनामनेकत्वात्तस्यानेकत्वमुच्यते। ईश्वरस्योपाधिरेकैवाऽस्ति, सा विद्येत्युच्यते। व्यष्टिरविद्याया एव कारणसूक्ष्मस्थूलेतित्रिविधशरीराणि धारयति, यत्सम्बन्धवशाज्जीवः क्रमशः प्राज्ञः, तैजसः, विश्वश्च कथ्यते। समष्टावभिव्यक्ता परमात्मनश्चैतन्यशक्तिरन्तर्यामी, हिरण्यगर्भः, विराडित्युच्यते। ईश्वरो जीवश्च चैतन्यशक्तेरेव नामन्तरे स्तः। केवलं मायाया द्विविधपरिणामाभ्यां भेदद्वयमिदं जातम्। कल्पनाद्वितयमप्येतत्पराशक्तेरेकदेशेऽस्ति—

विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत्।

पादोऽस्य विश्वा भूतानि।

इत्यादिभिर्वचनैरेतत्कथितम्। मायाभावस्य शोधनाऽनन्तरं शुद्धचैतन्यस्य परिचयो भवति। इदमेवाऽद्वैतमुच्यते। "अहं ब्रह्मास्मी"त्यादि वाक्यैरेतदेव कथितम्। निरपेक्षभावः शुद्धं ब्रह्म, तुरीयमथवा माण्डूक्योपनिषदि स एव 'शिव' इति कथितः। वस्तुत

इदमेव ब्रह्म मायायामुपविश्य नानाविधा लीलाः करोति, या हि माया गुणेभ्यः सर्वथा रहिताऽस्ति। इदमेवास्य जगतो निमित्त-कारणम् [कर्ता] उपादानकारणं चाऽस्ति। प्रकृतिरेतदधीनैव कारणमस्ति, न स्वातन्त्र्येण, अत एवोपादानकारणम् [मूलम्] अपि तदेतदुच्यते। विषयेऽस्मिन्, स्वतन्त्रप्रकृतिवादिनः साङ्ख्यस्य तथा ब्रह्मवादिनां वेदान्तिनामेवम्प्रकारेण संवादो भवति—

साङ्ख्यः—ब्रह्म चेतनत्वान्निमित्तमुपादानकारणं च न भवितु-मर्हति।

वेदान्ती—प्रकृतिरपि जडत्वन्निरपेक्षकारणीभूता न भवितु-मर्हति।

साङ्ख्यः—चेतनयुक्ता प्रकृतिर्जगतः कारणीभूता स्वीकर्तुं शक्यते। अस्यामवस्थायां जगद्रचना भवितुमर्हति।

वेदान्ती—प्रकृतियुक्तस्य चेतनस्याऽपि स्वीकारेण जगद्रचना भवितुमर्हति।

साङ्ख्यः—जडं विना चेतनस्य स्वतन्त्र्या क्रिया क्वापि न दृश्यते। जडसंयुक्त एव चेतनः कर्ता दृश्यते, कार्यसम्पादनयोग्यता च तस्मिन्नायाति। अत एव प्रकृतिरेव कारणमिति स्वीकर्तुमुचित-मस्ति।

वेदान्ती—यदि चेतनः कार्यं नेच्छेत तदा चेतनस्य संयोगे जातेऽपि कार्यं न सम्भवति, यथा चालको यदि वाहनोपरि स्थितोऽपि स्यात् तथापि यदि चालयितुं नेच्छेत तदा वाहनं चलितुं न शक्नोति। ब्रह्मणश्चेतनशक्त्यैव जगति क्रिया जायते, इयं तस्येच्छयैव जायते, यथाऽग्नेर्दाहप्रकाशगुणौ काष्ठ एव स्वसामर्थ्यं प्रकटयतः, द्वावपामौ गुणावग्नेरेव स्तो न काष्ठस्य, तथैव जगति नियामकरूपतया यो

व्यवहारो भवति स ब्रह्मण एवास्ति, न तु प्रकृतेः, अतः प्रकृतेर्निमित्त-कारणरूपकर्तृत्वस्वीकारो नोचितः।

साङ्ख्यः—परमुपादानकारणं तु ब्रह्म सर्वथा न भवितुमर्हति यतो हि जडस्योपादानकारणं तु जड एव स्वीकर्तुमुचितः। तदे-तद् दृष्टान्तविरुद्धमपि भवति यतोहि चेतनस्य जडोपादानकारणता लोके प्रसिद्धा नाऽस्ति। जडोपादानेनैव जडकार्यमुत्पद्यते, एवं स्वीकारे ब्रह्म विकारि स्यात्।

वेदान्ती—प्रकृतिमपि भवन्तो नित्यां स्वीकुर्वन्तः परिणामिनीं मन्यन्ते, अतो यत् विकारि भवति, तन्नित्यं न भवति—एतद्-व्याप्त्यनुसारेण दोषोऽयं भवत्यपि समायाति। अस्मन्मते माया सत्या नाऽस्ति, मायायाः सत्ता ब्रह्मण एव सत्ताऽस्ति। अत एव द्वैतस्य बाधः समानाधिकरणेन[१] [सर्वं खल्विदं ब्रह्म] 'वासुदेवः सर्व'मित्यादि प्रमाणानां सङ्गत्याऽभिन्ननिमित्तोपादानकारणं ब्रह्म सिद्धयति, अर्थात् प्रकृतेर्मूलतो ब्रह्मणोऽभिन्नत्वादभिन्ननिमित्तो-पादानकारणं ब्रह्माऽस्ति, स्वयं ब्रह्मणि परिणामाऽसत्त्वे प्रकृतावेव परिणामो भवति—यथा रज्जुसर्पः, स्वप्न पदार्थाः, इन्द्रजालिकस्य क्रीडनकपदार्थाः। अन्धकारे रज्जोरप्रतिभासाद्, निद्रादोषेण, दृष्टि-बन्धनेन वा स्वतोऽधिष्ठानीभूतरज्ज्वादौ दोषाऽभावेऽप्येषां प्रातो-तिकपदार्थानां सृष्टिर्भवति, तथैव जगदस्ति। ब्रह्मज्ञानानन्तरमेतस्य मिथ्यात्वं भवति।[२] ऊर्णनाभिद्वारा दृष्टान्तासिद्धिरपि नाऽस्ति।

---

१ मरुमरीचिकायाः सर्वं जलं बालुकैवास्तीति वक्तुं शक्यते। तथैव सर्वं ब्रह्मैवास्तीति कथ्यते। अधिष्ठानज्ञानानन्तरमेवं भवति।

२. यथोर्णनाभिर्जालमुत्पादयितुं स्वशरीराद्भिन्नं कारणं तथा नाऽपेक्षते यथा कुम्भकारः स्वस्माद् भिन्नं घटमुत्पादयितुं मृत्तिकामपेक्षते, कुम्भ-कारस्तु घटं प्रति केवलं निमित्तं भवति, परमूर्णनाभिस्तु निमित्तमुपा-दानंचेति द्वयमप्यस्ति।

साङ्ख्यः—तदा तु जगतः कारणं प्रकृतिः सृष्टेरादिकालेऽपि स्थितिमती जाता, तेन द्वैतं सिद्धम् ।

वेदान्ती—अस्माभिः पूर्वमेवोक्तं यत् प्रकृतिः सत्या नाऽस्ति । यदि ब्रह्मणस्तस्या भिन्नतया सत्ता सिद्ध्येत् तदा द्वैतं भवेत् सिद्धम्, ब्रह्मणः सत्तयैव सा स्थितमतीति द्वैतं न भवति ।

साङ्ख्यः—तदाऽपि कस्मिंश्चिद्रूपे प्रकृतेः सत्त्वं द्वैतं साधयति ।

वेदान्ती—यद्यनया रीत्या द्वैतं सिद्धयति तदा मरुमरीचिकाजलेन पिपासायाः शान्तिरपि भवेत्, क्रीडाकालेचैन्द्रजालिकस्य पदार्थानामपि सत्यता स्यात् ।

साङ्ख्यः—तदा किं प्रकृतिवादः मनागपि यथार्थो नाऽस्ति ।

वेदान्ती—नहि तथा नाऽस्ति, प्रकृतिवादोऽस्माकमपि मान्योऽस्ति तथापि निरपेक्षरूपेणप्रकृतिकारणतास्वीकारः सम्यङ् नाऽस्ति—

मयाऽध्यक्षेण प्रकृतिः सूयते सचराचरम् ।

अर्थान्मदध्यक्षतायामेव प्रकृतिः सचराचरं जगदुत्पादयति । गीतावचनेनाऽनेन भवदीयः सिद्धान्तो विरुध्यते, पूर्वोक्तेन युक्तिवादेन चापि सम्यङ् न सिध्यति । अतएव ब्रह्मवाद एव स्वीकरणीयः ।

साङ्ख्यः—प्रकृतेरीश्वराधीनत्वस्वीकारे तस्या भिन्नतास्वीकारे का हानिरस्ति । येन प्रकारेण राज्ञः प्रजायाश्च भिन्नत्वे सति सम्बन्धो भवति, तथा यदि स्वीक्रियेत तदा प्रकृतिवादो भिन्नतयैव सिद्धयति ।

वेदान्ती—उपनिषदि प्रकृतिः परमात्मनः शक्तिरिति बोधितम्—

पराऽस्यशक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च ।

अर्थात् परमात्मनः पराशक्तिः स्वभावतो ज्ञानबलक्रियावत्यस्ति शक्तिशक्तिमतोरभेदो भवति ।

मायान्तु प्रकृतिं विद्यान्मयिनं तु महेश्वरम् ।

प्रकृतिरेव परमात्मनो मायाशक्तिरस्ति, महेश्वर एव प्रधान-मायाधीश्वरोऽस्ति, 'शक्तिशक्तिमतोरभेदः' इत्यादि प्रामाणिकवचनै-रीदृशः प्रकृतिवादो विरुद्धो भवति । प्रामाणिकैः शास्त्रवचनैर्विरुद्ध-त्वमप्येका हानिरेवाऽस्ति, केवलं प्रकृतिकार्यम्—यद्धि नामरूपयुतम्, कारणात्पृथक् प्रतीयते, तदेव मिथ्योच्यते । वस्तुवस्तु ब्रह्मैवाऽस्ति । यदि प्रकृतिः पृथक् स्वीक्रियते तदा ब्रह्मणि प्रकृतौ च भेदे जाते परिच्छिन्नत्वमल्पत्वं विनाशित्वं च प्राप्तं स्यात् । भेदे तदेतदा-वश्यकमस्ति—यथा घटपटादयः । अभेदस्वीकारे न भवति कोऽपि दोषः । अतएवाऽद्वैतब्रह्मवादः सिद्धो भवति । सङ्क्षेपेण ब्रह्मवाद-स्यायमस्ति निष्कर्षः । मतेऽस्मिन् भेदो द्वैतं वा काल्पनिकमस्ति ।

१ . विवेक-वैराग्य-षट्सम्पत्तिमुमुक्षुतेति साधनचतुष्कसम्पन्न-तायां जातायां श्रवणमननिदिध्यासनस्य सम्पन्नत्वे—'अहंब्रह्मा-स्मी'त्यादि-महावाक्यैरद्वैतसाक्षात्कारः सञ्जायते । एतानि साध-नानिज्ञानमार्गपथिकेभ्याऽत्यन्तमावश्यकानि मतानि । (अ) पर-मात्मा एव सत्यमस्ति, तदभिन्नमसदस्तीति निर्णयो विवेक उच्यते । (ब) भोगबुद्धेः सर्वथा त्यागो वैराग्यमित्युच्यते । (स) षट्-सम्पत्तौ प्रथमा मनसो निग्रहः शमः, द्वितीया बाह्येन्द्रियाणां दमनं दमः, तृतीया भोगेभ्य उपराम उपरतिः, चतुर्थी द्वन्द्वसहनस्य क्षम-त्वम् तितिक्षा, पञ्चमी गुरौ वेदान्तवाक्येषु च विश्वासः श्रद्धा वा, षष्ठी मनसो विक्षेपस्य नाशः समाधानमुच्यते । (द) मोक्षप्राप्ते-रिच्छा मुमुक्षुता कथ्यते । अध्यात्मशास्त्राणामभिप्रायो विद्यते केवल मेकस्य ब्रह्मणः प्रतिपादने । एतस्य निर्णयः श्रवणम्, श्रुतस्यार्थस्य

तर्कद्वारा निर्णयो मननम्, श्रुते मते चार्थे चित्तस्य स्थापनं निदिध्यासनमुच्यते ।

आत्मा वा अरे श्रोतव्यो मन्तव्यो निदिध्यासितव्यः—

अनया श्रुत्यैषोऽर्थः सङ्गतो भवति । 'शान्तो दान्त उपरतस्तितिक्षु'—रादि श्रुतिषु साधनचतुष्टयस्य सङ्गतिर्विद्यते । एतदनन्तरं ज्ञानयोगिनो भवत्यद्वैतसाक्षात्कारः । एतानि ज्ञानस्य बहिरङ्गसाधनानि तथा महावाक्यान्यन्तरङ्गसाधनानि कथ्यन्ते । ज्ञाने जाते सञ्चितानि क्रियमाणानि च कर्माणि नश्यन्ति, केवलं प्रारब्धकर्माण्यवशिष्यन्ते । तेषां भोगद्वारा समाप्तिं विधाय ज्ञानी देहान्ते मुक्तो भवति । इदमेव विदेहकैवल्यमुच्यते ।

१२. बहव आचार्या वेदान्तेन सह वैराग्य-भक्तिकर्मणामपि प्रधानरूपेण सम्बन्धं प्रतिपादयन्ति । ते वदन्ति—"सर्वः स्वार्थं समीहते", समस्तः संसारः स्वीयमभिलषितार्थमेव वाञ्छति, अत एव यावत् संसारस्य स्वार्थसिद्धिर्भविष्यति तावत् संसारस्तव सहयोगं प्रदास्यति, यस्मिन्दिने स्वार्थो न भविष्यति तदा न कोऽपि तव सहयोगी भविष्यति । अत एव संसारस्य मिथ्यात्वं निध्याय व्यवहारकर्ता पश्चात्तापं न प्राप्नोति । अत एव तत्त्वज्ञानेन सह मुख्यरूपेण वैराग्यभक्तेरुपदेशो महात्मभिः कृतो यदस्य रहस्यस्य स्मृतिर्निरन्तरं मनुष्ये तिष्ठेत् ।

वयसि गते कः काम विकारः शुष्के नीरे कः संसारः ।
क्षीणे वित्ते कः परिवारः ज्ञाते तत्त्वे कः संसारः ॥

अर्थादवस्थाया अपगमे कामविकारो किम्प्रयोजनः, जले शुष्के जलाशयः किमर्थकः, धने नष्टे परिवारः कस्मायपि प्रयोजनाय न भवति, तथैव ब्रह्मणि ज्ञाते संसारो न भवति ।

स्वामी शंकराचार्यः

॥ इति चतुर्थः खण्डः ॥

५. अवशिष्टरत्नमणिग्रन्थनम्

विगतप्रकरणेऽनेके विवादास्पदा विषया लिखिताः, ये ज्ञानित्वेन भक्तत्वेन च प्रसिद्धानां विचारकाणां मतेषु समायान्ति। तेषु यो मतभेदो विद्यते सोऽप्यधिकारिभेदादेव विद्यते, सोऽप्यवान्तरो भेद एवाऽस्ति न तु सिद्धान्तस्य। विचारपूर्वकदर्शनेन समन्वयरीत्या तत्रैकता साधयितुं शक्यते। अत एव प्रकारणमिदमत्र लिख्यते।

१. ज्ञानस्य यथार्थं फलं विवेको, वैराग्यम्, नम्रता, सदाचारः, विश्वप्रेम, अभिमानत्यागः, सर्वेषां हितसम्पादनं चाऽस्ति। आत्मानं सर्वोत्कृष्टं मत्वाऽन्यस्मिन् तुच्छत्वज्ञानं ज्ञानं नास्त्यपितु तादृशो विचारः ज्ञानस्य विरोधी भवति। तथैव भक्तिमार्गे परमात्मनो अनेकानि रूपाणि यान्युपास्यरूपे निश्चितानि, तेषु न्यूनाधिकतायाः परिकल्पनम्, यन्मदीयो देवः सर्वश्रेष्ठोऽस्ति, अन्यस्य चाश्रेष्ठः इति विचार उपासनाया विरोधी भवति, लोके दम्भ प्रकटनाय कर्मानुष्ठानं कर्ममार्गस्य विनाशकमस्ति। अतो दोषत्रयादस्माद् दूरे स्थातव्यम्। चतुरैः साधकैरेतद्विषये सावधानतया वर्तितव्यम्। सत्यस्य विरुद्धतया कोऽपि शब्दो मुखान्न कदापि निस्सारणीयः।

२. ज्ञानमार्गस्य साधकैर्निरभिमानिभिर्जिज्ञासुभिश्च भवितव्यम् कदाप्येतन्न ध्येयं यदहं बहु ज्ञातवान् सर्वज्ञो वा सञ्जात इति। केनाऽपि वस्तुना द्वेषो न करणीय, शोभनाशोभनसर्ववस्तूनां समबुद्ध्या निरीक्षणं कार्यम्। निरपेक्षबुद्ध्या प्रत्येकः पदार्थः परीक्षणीयः। अनया रीत्या यज्ज्ञानं प्राप्यते, वस्तुतस्तदेव यथार्थं ज्ञानमस्ति।

३. यथार्थतया परं ब्रह्मैव ज्ञानस्वरूपमस्ति। अन्तःकरणस्य सात्त्विकवृत्तयस्तु तस्याऽभिव्यञ्जिकमात्रत्वेन वर्तन्ते। ज्ञानं जडस्य नास्ति धर्मः भागो वा। यथा यथा सात्त्विकवृत्तीनां विकासो भवति तथा तथा ज्ञाने वृद्धिः सञ्जायते। अनन्या भक्तिः, निष्कामः कर्मयोगः, ध्यानाभ्यासश्च वृत्तीरुच्चावस्थायां प्रापयन्ति। एतत्त्रितयमपि ज्ञानस्य यथार्थसाधनमस्ति "अहं ब्रह्मास्मि", 'तत्त्वमसि', प्रभृतीनि महावाक्यान्यस्यैव ज्ञानस्य सर्वोच्च प्रमाणानि स्वीक्रियन्ते। एतान्यपि वृत्तिज्ञानान्येव सन्ति, शुद्धज्ञानस्वरूपं तु परं ब्रह्मैवाऽस्ति। तद्व्यञ्जकतया वृत्तिरपि गौणरूपेण ज्ञानमित्युच्यते।

४. भक्तिमार्गानुगामिना भक्तेन निखिलं जगत् प्रेमबुद्धया द्रष्टव्यम्, द्वेषेण हीनबुद्धया वा कोऽपि प्राणी न द्रष्टव्यः। आनन्दात्मकानां गुणानां कीर्तनम्, उपदेशः, स्वाध्यायः, आनन्दपूर्णैः सद्भिश्च सह सत्सङ्गः करणीयः। आनन्दात्मकानां भगवदवताराणां चरित्रश्रवणे मग्नेन भाव्यम्। तत्त्वस्यास्याविष्काराणां सत्पुरुषाणां वचनानां पाठः, प्रवचनं मननं च कार्यम्। एतेन सात्त्विकानां सुखात्मकवृत्तीनां विकासो भवति।

५. एवं कृत्वा भक्त आनन्दस्वरूपाद् ब्रह्मणअभिन्नतां प्राप्नोति, यां भक्तिः, प्रेम, परानुराग इति वदन्ति। सा स्थितिः सात्त्विकानां सुखात्मकवृत्तीनां चरमा परिणतिरेवाऽस्ति, याथार्थ्येन प्रेम्णो रूपं तु ब्रह्मैवाऽस्ति, सात्त्विकसुखादिवृत्तिषु तु तस्यैवाभासः प्रतीयते। "God is love and love is God" वाक्येऽस्मिन्नेतदेव तत्त्वं कथितमस्ति। एतस्यैव प्रेम्णः सम्प्राप्तये वैधी रागात्मिका च द्विविधा भक्तिरभिमताऽस्ति। नवधाभक्तिरप्येतदर्थमेव कथिता। यावत्पर्यन्तं सात्त्विकानां सुखात्मकवृत्तीनां पूर्णो विकासो न भवति तावद्भक्तः साधकः पूर्णां सिद्धिं न प्राप्नोति। यदा सम्पूर्णं विश्वमा-

भगवद्योगलभ्यम्, साधनविहीनास्तदिदं न द्रष्टुमर्हन्ति। गीताया एकादशाऽध्याये यद् विश्वरूपदर्शनमुक्तम् तदपीदृशमेवाऽस्ति।

"दिव्यं ददामि ते चक्षुः" इति वचनेनेदं प्रतीयते यत् तद्रूपं चर्मचक्षुषा द्रष्टुं न शक्यते। भगवत्कृपैव तं दर्शयितुं समर्थाऽस्ति। अद्वैतसिद्धान्ते विषयोऽयं नाऽयाति। निराकाराद् ब्रह्मणो लघीयानयं स्वीकृतः, तथाप्यनुभव ईदृशो नास्ति, बहूनां साधकानामेतेन विरोधोऽप्यस्ति, इदमपि न वक्तुं शक्यते यत् सच्चिदानन्दस्वरूपस्याभिव्यक्तिर्नभवितुमर्हतीति—यतो हि यदा देवतायाः साक्षात्कारो भवति तदानीं या मूर्तिःसाक्षात्कारे समायाति सा अविद्यात्मिका नाऽस्ति, निश्चयरूपेण सा सच्चिदानन्दात्मिकाऽस्ति। मन्त्रैरवश्यं सा भावात्मकरूपे परिणता, अत एव तस्या अविद्यात्मकत्वस्वीकारो नोचितः। यथाऽकारविशेषे [सांचा] परिणतः स्वर्णस्तदाकारयुतः प्रतीयते तथापि स्वर्णस्य तदाकारता (सांचा) स्वीकारो भ्रान्तिरेव।

ज्ञानी—अवताररूपेऽभिव्यक्तिर्मायाया एवाऽस्ति, चेतनस्य सा नाऽस्ति, यतोह्याकृतिर्मायायामेव विद्यते, चेतने केवलं पराशक्तिर्व्यक्ता भवति।

भक्तः—पराशक्तेर्ब्रह्मणश्चाऽभेदसत्त्वात् पराशक्तिरेवाऽभिव्यक्ता भवति नतु ब्रह्मेति कथनमेकदेशीयमस्ति।

ज्ञानी—मायायां भासितं तत्त्वमवश्यं सच्चिदानन्दरूपमस्ति, तथापि तन्मूर्तिर्मायिकैवाऽस्ति। साधकस्य शुद्धसत्त्वात्मिका भावनैव या हि तदन्तःकरणेन निर्मिता भवति, सैव मूर्तिरूपं धारयति। वस्तुतः सच्चिदानन्दास्याकृतिर्नभवितुमर्हति। "मायया सम्भवामि" इत्यस्य नायमाशयो यत् सच्चिदानन्दस्य मूर्तिर्निर्मिता भवति, "मायया" इति पदेन स्पष्टं ज्ञायते यदस्मदोयोऽवतारो मायया

भवति न तु स स्वाभाविकः चेतन आकृत्या रहितः सन्नात्ममायया प्रकृतितत्त्वं व्यञ्जयति, सा व्यक्तिः प्रकृतेर्भवति, गौणरीत्या ब्रह्मणि व्यवहृतत्वात् ब्रह्म प्रकटं भवतीत्युच्यते—यथा मायिकाः पदार्थाः प्रातीतिका भवन्ति तथैव ब्रह्माऽपि शरीरवदिव प्रतीयते। वस्तुतः प्रकृतेः शुद्धसत्त्वांशः यो विद्येत्युच्यते तस्यैव विग्रहो निर्मितो भवति। ब्रह्म निर्गुणं निराकारं चाऽस्ति, तस्याकृति स्वीकारोऽनुचितो भवति।

भक्तः—ब्रह्मणो निर्गुणत्वस्य निराकारत्वस्य च स्वीकारः समुचितो नाऽस्ति, उपनिषत्सु छान्दोग्यस्याष्टमेऽध्याये बृहदारण्यकस्य च पञ्चमेऽध्याये ब्रह्मविद्यायाः पर्यंसानं भवति, यत् सगुणब्रह्मविषयकमस्ति। उपक्रमोपसंहारन्यायेनादावपि सगुणब्रह्मण एव निरूपणं स्वीकर्तव्यम्। "अनावृत्तिः शब्दात्" इति वेदान्तसूत्रे महर्षिणा व्यासेन सगुण एव ब्रह्मणि वेदान्तविचारस्य पर्यवसानं कृतम्। यद्येवं न स्वीक्रियेत तदा समस्तस्याप्युपनिषदभिप्रायस्य गौणत्वं स्वीकर्तुमापद्येत, तच्च नोचितम्। निर्गुणविद्यात्यल्पीयसी विद्यते या केवलस्य ब्रह्मणः प्रकृतेर्विरहितामवस्थां बोधयति अर्थात् प्रकृतिगुणेभ्यो विरहितत्त्वाद् ब्रह्म निर्गुणमस्ति वस्तुतो न, प्रत्युतानन्तकल्याणगुणयुक्तं तदस्ति। सर्वसामर्थ्यसम्पन्नत्वात्तस्यावतारोऽपि भवितुमर्हति।

ज्ञानी—यं भवन्तो गुणं वदन्ति ते भवतां पारिभाषिका शब्दाः सन्ति। तत्त्वतो स्वरूपाद् भिन्नः गुणनामकः कश्चन पदार्थो नाऽस्ति। यदि गुणगुणीभावः स्वीक्रियते तदा तयोः पृथगेकः सम्बन्धः स्वीकर्तव्यो भविष्यति, स भविष्यति संयोगः समवायो वा। यदि संयोगसम्बन्धः स्यात् तदा यस्मिन् देशे संयोगो भवेत्तत्र सगुणत्वम्, तद्भिन्नदेशे च निर्गुणत्वसिद्धिरनिवार्या स्यात्। समवायोऽपि स्वरूपाद् भेदाऽभावादसिद्धः, यतो हि सम्बन्धस्यैकदेशीय-

तया भिन्न पदार्थद्वये स भवति। सगुणब्रह्मणः, पदार्थस्य गुणस्य च सम्बन्धोऽसिद्धोऽस्ति। यदि सच्चिदानन्दस्वरूपमेव ब्रह्मास्ति तदा नाऽस्ति काऽप्यापत्तिः। सच्चितोर्गुणत्वे तदिदं केवलं कथनमात्रमस्ति यद् ब्रह्मसगुणमस्तीति। ब्रह्मणि गुणाः सन्तीति स्वीकारेणाधाराधेयभावस्वीकारेण, ब्रह्मणो गुणेभ्यः पार्थक्यं सिद्धयति। एतेन निर्गुणस्यैव सिद्धिर्जायते। गुणा अपि ब्रह्मैव भवेयुश्चेदापत्तिर्नास्ति कापि। ब्रह्मणि सौन्दर्यं तिष्ठतीति नाऽस्ति, किन्तु सौन्दर्यं स्वयं ब्रह्मैवाऽस्ति। उपनिषद्युत्तमं पक्षमुपस्थाप्य मध्यमाऽधिकार्यपेक्षयाऽन्ते सगुणवादो गृहीतः, इयमेव रीतिर्व्याससूत्राणामप्यस्ति। इदमपि कथनं नोचितं यत् निर्गुणविद्यायाऽत्यल्पत्वात् सगुणपक्षे वेदान्तानामभिप्रायो मन्तव्यस्तथा वेदान्तविद्योपासनाभक्तिपरेति स्वीकरणीयम्। उपासनातोऽप्यधिका तु कर्मविद्या व्याख्याताऽस्ति, ततः कर्मविद्यायामेवोपासनाया अभिप्रायः स्वाकरणीयः। तदानीं कर्ममीमांसैवैकं शास्त्रं तिष्ठेत्, उपनिषदो ब्रह्मविद्याया वा पृथक् शास्त्रत्वमेव तदाऽनुपपन्नं स्यात्। ब्रह्मणः सर्वसामर्थ्ययुक्तत्वस्वीकारस्य नायमाशयो भवति यद् ब्रह्म नियमविरुद्धानि कार्याणि कुर्यात्। तस्यैतस्मिन्विषयेऽयमेवाऽस्ति नियमो यदाऽकृतिर्जडस्यैव भवति न चेतनस्य। चेतनस्याकृतिस्वीकारेऽव्यवस्था भविष्यति। अव्यवस्थायां कल्पना निरङ्कुशरूपेण भविष्यति। तदा सर्वसामर्थ्यविषयेऽनित्यत्वविनाशित्वस्यापि कल्पना रुद्धा न स्यात्। अत एवाऽवतारमूर्तिषु कर्मणोऽपि सम्बन्धो बोधितः, बालिवधस्य निष्कृतिः कृष्णावतारे जरानामकेन व्याधेन गृहीता। तथाऽप्येता मूर्तयः शुद्धसत्त्वस्य भवन्तीति जीवानां मलिनसत्त्वात्मकमूर्तिभ्यो विलक्षणाः सन्ति। अतः सच्चिदानन्दात्मकविग्रहस्वीकारोऽनुचितः। भक्त्याचार्यैर्भक्तानां श्रद्धावर्धनार्थमेतदुक्तम्, वस्तुतस्तथा नाऽस्ति।

भक्तः--भवतामिमे सर्वेऽपि तर्का गौणमेवपक्षं गृहीत्वा प्रव-

र्तन्ते । गौणमुख्ययोः प्रसङ्गे मुख्यमेवग्राह्यमित्यस्ति शास्त्रनिर्णयः । "सम्भावाम्यात्ममायया" इति वाक्ये "सम्भवामि" इति पदमुत्तम-पुरुषस्येति तेन ब्रह्मण एव ग्रहणमुचितम् । अवतारमूर्तिषु कर्मणः सम्बन्धो वास्तविको न भवति ।

एवं वादिद्वये वादविवादः प्रसरति । विस्तारं परित्यज्येद-मत्रैव समाप्यते, पाठकेष्वेवाऽस्य निर्णायकत्वं निक्षिपामः ।

८. सगुणोपासकेषु माननीयेषु सत्स्वनेकाः श्रेणयः सन्ति, तथापि पञ्चभिः प्रकारैस्तेषां भेदः क्रियते–ये हि-वैष्णव-शैव-गणेश-सौर-शाक्ता उच्यन्ते क्रमशस्तेषां कतिपयलक्षणानि लिख्यन्ते ।

यो दीनानां हितं सम्पादयति, ब्रह्मचर्यपुरस्सरं सतां सेवा यस्य मुख्यं कर्तव्यं भवति, परोपकारो यस्य मुख्याङ्गम्भवति तादृशस्य भक्तियोगस्य योऽनुष्ठानं करोति, यो दम्भादतिदूरे तिष्ठति, हरि-चर्चायामेव यस्याऽधिका प्रीतिरस्ति, यः शिवे विष्णौ चाऽभेदं ध्यायति, यः सकामानि कर्माणि विषवन्मनुते, कस्मिन्नपि वस्तुनि यस्य द्वेष-दृष्टिर्न भवति, पाखण्डम्, भेदबुद्धिं च यो हेयतया पश्यति, यदृच्छालाभसन्तुष्टोऽनिकेतवासी यः परमं दैन्यभावमवलम्बते तमेव यथार्थं वैष्णवं वदन्ति । स एव महात्मा भगवतो विष्णोरुपासनाया उत्तमोऽधिकारी भवति ।

९. पूर्णस्तत्त्वज्ञो योगाभ्यासी विरक्त आत्मारामः समाधिमद-मत्तो यो मनसः प्रहर्षाय मादकद्रव्याणि नापेक्षते, कामं क्रोधं देहाभिमानं यो ज्ञानाग्नौ भस्मसात्कृत्वा समस्तेष्वङ्गेषु भस्मलेपनं करोति, यो मधुरभाषी भवन् समस्तं संसारं शिवस्वरूपं जानाति, भक्तिरूपिण्यां गङ्गायां यः सदैव स्नानं कुरुते, ब्रह्मविद्यारूपिण्या उमाया य आराधनां करोति, सर्ववस्तुषु भगवतः शिवस्यैव यस्मै दर्शनं जायते स एव यथार्थः शैवोऽस्ति ।

१०. यो बुद्धिसागरो भवति स एव पुरुषः सर्वैर्विघ्नैर्विमुक्तो भवितुमर्हति, यस्योदरमतिविस्तृतमस्ति, यस्मिन् समस्तविचाराणां समावेशो जायते, सद्विचारेण ज्ञानेन सदाचारेण च यस्य मस्तकं हस्तिवदुन्नतमस्ति, यो निश्चयरूपमेकदन्तं धारयति, यः सर्वेषां सन्मार्गप्रदर्शको नेताऽस्ति, दुष्टानां राक्षसीयप्रकृतियुक्तानां पुरुषाणाम् ये हि सदैवोत्तमकार्यभ्रंशमेव हितं मन्वते, तान् यो निस्तेजसः कुर्वन् जगतो मङ्गलं करोति, अवश्यमेव तादृशस्य पुरुशस्य नामोच्चारणेन विघ्नानां विनाशस्तथा समस्तसिद्धीनां प्राप्तिर्जायते, यतोह्येतत्सर्वं श्रीगणेश भक्त्या तेन समासादितमस्ति।

११. यो ज्ञानरूपिणः प्रकाशस्य प्रसारे किञ्चिदपि पक्षपातं न करोति, यदयमस्ति ब्राह्मणोऽस्मैसमधिकं प्रदेयमयं चाऽस्ति चाण्डालः पतितो बहिष्कृतश्चायमन्धकारे तिष्ठतु, यः सर्वेषां नेत्रेषु ज्योतिर्दत्वा स्वस्वमार्गदर्शने समर्थान् कुरुते स एव सूर्य उच्यते। यतो तादृश समता प्रदर्शनेऽपि यदुपरि कस्यापि दोषस्य प्रभावो न जायते, स्वविचाररूपकिरणद्वारा यः समस्तं जगत् पोषयति, तत एव स पूषेत्युच्यते। समस्तप्रजायाः स्वामिनः प्रजापतेर्यः प्रतिनिधिरस्ति अत एव स प्राजापत्यः कथ्यते। सर्वेषां कर्तव्यमार्गे प्रेरणात् सद्बुद्धिप्रेरणाच्च स सवितेत्युच्यते। य इमान् गुणानात्मनि धारयति, स एव स्वास्थ्यलाभं कृत्वा शोभनं शरीरं प्राप्नोति, जगतो रोगिणां स एव यथायथमुपचारं कर्तुं शक्नोति। तमेव सौरं भागवतं वदन्ति।

१२. या पराशक्तिः जगति चैतन्यं प्रदाय स्वरूपप्रदर्शनयोग्यतां ददाति, सच्चिनन्दात्मकं यस्याः स्वरूपमस्ति, ब्रह्मविष्णुमहेशा अपि यस्या आशां कुर्वन्ति, या दयामयी विद्यते, स्वीयासु समस्तसंततिषु यस्या निस्सीमा कृपा विद्यते, यस्याः सहायतां विना ब्रह्माऽपि शवतुल्यं जायते, मात्रर्णमुक्त्यर्थं तस्या भक्तिः सर्वैरेव

सांसारिकैर्धारणीया। एतादृश्या जगन्मातुर्भक्तिं यो न धारयति, यथार्थतस्तस्याऽतीव दुर्भाग्यं भवति, यतो ह्यैश्वर्य-भुक्ति-मुक्ति-ज्ञान-निःश्रेयसादिफलानां प्रदात्री सैवाऽस्ति।

विषयेभ्यः पूर्णतया विरक्तः, जितेन्द्रिय आप्तकामो दीनसहायकः, कृपामूर्तिः बुद्धिबले यो बृहस्पतिमपि चकितं कर्तुं सामर्थ्यं धारयति, कामक्रोधमोहादिपशूनां यो बलिप्रदानं करोति, अहिंसादिभिः पुष्पैर्यः शृङ्गारं करोति, घृणालज्जाद्यष्टपाशैर्यो मुक्तो भवति, श्रीगुरुचरणविनिःसृतां सुधां यः पिबति, सुषुम्नान्तर्गतकुण्डलिनी-शक्त्या यो रमते, वैदिकधर्मस्य वर्णाश्रमस्य च विरोधिनां मूकत्वं यः सम्पादयितुं सामर्थ्यं धारयति, भगवद्भक्तेषु यस्याऽस्ति प्रेम, तेषां सेवा रक्षा च यस्य भवति मुख्यमुद्देश्यम्, स्वनिपुणविचार-शक्त्या पाखण्डं दम्भं च पराभूय सद्धर्मं सदाचारं च विस्तारयति, निषिद्धकामनानां मारणे, लोभमोहयोरुच्चाटने, कामक्रोधयोर्विद्वेषणे, आपत्तीनां स्तम्भने, इन्द्रियाणां वशीकरणे दैवगुणानां मोहने, एवं षट्कर्मानुष्ठाने यः सिद्धहस्तो भवति, स एव यथार्थतो जगन्मातु-रूपासको वीरः पुरुषः शाक्त इति वक्तुं युक्तोऽस्ति। स एव पुरुषो-ऽस्मिन्घोरे कलावपि पतितान्दीनहीनाञ्जनान् शुभसन्देशं श्रावयितुं कृतकार्यो भवितुमर्हति, मातुश्च समस्तायाः कृपाया पात्रभूतः स एव भक्तोऽस्ति।

शरणागतदीनार्तपरित्राणपरायणे
सर्वस्यार्तिहरे देवि नारायणि नमोऽस्तुते।

१३. यथा प्रवहणशीलाः सर्वा नद्यः समुद्रे विश्रान्तिं लभन्ते तथैव समस्ता आश्रमिणो गृहस्थाश्रम एव सुखं लभन्ते। गृहस्था-श्रमः सर्वेषां पोषक आधारश्चाऽस्ति। यथा सन्यासाश्रमो निवृत्तौ प्राधान्यं भजते तथैव गृहस्थाश्रमः प्रवृत्तौ सर्वज्येष्ठो भवति। "तस्माज्ज्येष्ठाश्रमो गृही", मनोरस्य वचनस्यायमेवाऽस्त्यभिप्रायः।

प्रवृत्तेर्यथार्थतया स्थापनाय अन्यैस्त्रिभिराश्रमैः सर्वदा गृहस्थस्य हितचिन्तनं विधेयम् ।

प्रत्यहं देवाऽतिथिब्रह्मपितृभूतेति पञ्चमहायज्ञानां कर्ता, स्वाऽध्यायनिरतः, ऋतुकाले स्वदाररतः, अधिकारिणे दानप्रदाता यो वेदमार्गानुयायीश्वरभक्तोऽस्ति, स एव सद्गृहस्थ उच्यते ।

१४. यः कामिनीकाञ्चनविरतः, पूर्णोऽहिंसकः अभेदरूपेण ब्रह्मचिन्तकः, वैराग्य-शील-क्षमा-दया-र्जवादिगुणसम्पन्नः प्रियवादी, जगतः सन्मार्गोपदेष्टा, नामरूपे समासक्तिरहितो यो महात्माऽस्ति, तमेव सन्यासिनं वदन्ति ।

१५. मनुष्यस्य काऽपि साधना-योगोभक्तिर्ज्ञानमित्यादयस्तदैव फलन्ति यदा स परमात्मनः कृपां प्राप्नोति । अत एव सर्वमन्यत्-परित्यज्येमां प्राप्तुमेव प्रयत्नो विधेयः । सदाचार एव सर्वश्रेष्ठं वस्तु विद्यते, तं विना बाह्याडम्बरैर्नं किमपि फलं प्राप्तुं शक्यते । आत्मना सहान्यैः कृतानामपकाराणां विस्मरणमेव यथार्था महात्मताऽस्ति । जीवमात्रे दयाकरणम्, सर्वेषां नारायणबुद्धया सेवा-सम्पादनमेवाऽस्य जीवनस्य सर्वोच्चं कर्तव्यमस्ति कलहेर्ष्याद्वेषाणां त्याग एवोत्तमस्त्यागो भवति । कलहादिना हानेरतिरिक्तं न किमपि मिलति ।

एतस्या मालाया आवर्तकैरेतेषां मेरुभूतानां सिद्धान्तानामुल्लङ्घनं न विधेयम् । येऽस्या मालाया विचारपूर्वकं धारणं कृत्वाऽऽवर्तनं विधास्यन्ति तेषामुपर्यन्तर्यामी परमात्माऽवश्यं कृपादृष्टिं करिष्यतीति दृढनिश्चयोऽस्ति ।

॥ इति ॥

७
८.
९.
१०.
११.
१२.
१३.
१४.
१५.
१६.
१७.
१८.
१९.
२०.
२१.
२२.
२३.
२४.
२५.

राष्ट्रगुरु १००८ श्री स्वामी जी महाराज द्वारा रचित एवं श्रीपीताम्बरा पीठ संस्कृत परिषद् दतिया द्वारा प्रकाशित ग्रन्थ

१.	श्रीबगलामुखी रहस्यम्	(संस्कृत)	१८–००
२.	पञ्चोपनिषद प्रकाश भाष्य	,,	४–५०
३.	प्रश्नोपनिषद	,,	१–००
४.	आनन्द–लहरी	,,	७–००
५.	नारदीय शिक्षा	,,	१–५०
६.	महात्रिपुरसुन्दरी पूजा पद्धति	,,	५–००
७.	कामकला विलासः	,,	५–००
८.	महाविद्याचतुष्टयम्	,,	८–००
९.	रेणुका–तंत्रम्	,,	६–००
१०.	शरभ–तंत्रम्	,,	५–००
११.	श्रीविद्यारत्नसूत्रम्	,,	३–००
१२.	पञ्चस्तवी	,,	०–५०
१३.	तांत्रिक–पञ्चांग	,,	७–००
१४.	घेरण्ड–संहिता	(भाषानुवाद)	५–००
१५.	प्रत्यभिज्ञाहृदयम्	(हिन्दी)	२–००
१६.	ईश्वर–गीता	(भाषानुवाद)	६–००
१७.	वैदिक–उपदेश	(हिन्दी)	५–००
१८.	,, ,,	(अंग्रेजी)	१५–००
१९.	अथर्ववेदीय ज्योतिषम	(हिन्दी)	१–००
२०.	पुरश्चरण पद्धतिः	(हिन्दी)	२–५०
२१.	वेदान्त–प्रबोधः	(सानुवाद)	२–००
२२.	लेख–संग्रह	(हिन्दी)	१२–००
२३.	सिद्धान्त–रहस्य	(हिन्दी)	३–००
२४.	सिद्धान्त रहस्यम्	(संस्कृत)	३–००
२५.	सौंदर्य लहरी	(पद्यानुवाद)	१–००

२६.	परश्चरणम्	(हिन्दी)	१–००
२७.	त्रिपुर महिम्न स्तोत्रम्	(भाषानुवाद)	३–००
२८.	चिद्–विलासः	(संस्कृत,) (हिन्दी)	१–५०
		(अंग्रेजी)	३–००
		(सजिल्द)	७–००
२९.	सप्तविंशति रहस्यम्	(संस्कृत)	७–००
३०.	वातुलनाथ सूत्र	(भाषानुवाद)	२–००
३१.	शिवसूत्रं–भक्तिसूत्रञ्च	(संस्कृत)	१–००
३२.	शिवसूत्रं–स्पंदकारिका	(भाषानुवाद)	१–५०
३३.	मातृका चक्र विवेक	,	१५–००
३४.	स्वरोदय–विज्ञान	(हिन्दी)	३–००
३५.	योग–विज्ञान भाग प्रथम	(हिन्दी)	४–००
३६.	योग–विज्ञान भाग द्वितीय	(हिन्दी)	४–००
३७.	योग–दर्शन	(संस्कृत)	२–५०
३८.	योग–दर्शन	(अंग्रेजी)	४–००
३९.	दर्शन शास्त्र संग्रह	(हिन्दी)	५–००
४०.	छिन्नमस्तानित्यार्चन	(संस्कृत–हिन्दी)	६–००
४१.	ताराकर्पूरराजस्तोत्रम्	,,	१–५०
४२.	केनोपनिषत्	(भाषानुवाद)	२–००
४३.	ईशावास्योपनिषत्	,,	३–५०
४४.	शाक्त सौरभ (प्रथम खण्ड)	(हिन्दी)	७–००
४५.	शाक्त सौरभ (द्वितीय खण्ड)	(हिन्दी)	१२–००
४६.	माण्डूक्य उपनिषद्	(भाषानुवाद)	१–७५
४७.	पराप्रवेशिका	(संस्कृत–हिन्दी)	०–७५
४८.	कठोपनिषद्	(भाषानुवाद)	५–५०
४९.	ललिता सहस्रनाम	(संस्कृत)	३२–००
५०.	मुण्डकोपनिषद्	(भाषानुवाद)	६–००
५१.	सुभगोदय	(भाषानुवाद)	मुद्रणाधीन

आवश्यकतानुसार मूल्य में परिवर्तन हो सकता है।

श्री पीताम्बरा पीठ
ह्रीं
दतिया (म.प्र.)